This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीमद्देवीभागवत दशमस्कंधः प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ देवेंद्रमौलिमंदारमकरंदकणारुणौ ॥ अरुणाचरणौवंदेकरुणावरुणालयौ ॥ १ ॥ चतुर्विंशतिभिःपद्यैर्मनोःस्वायंभुवस्यच ॥ आख्यानंवर्ण्यतेसम्यगत्रदेव्याःकथानकम् ॥१॥ तत्राष्टमस्कंधादौजनमेजयेनराज्ञाभगवत्याविराट्स्वरूपंपृष्टम् तथायस्मिन्यस्मिंश्चवैस्थानेयेनयेनचपूज्यते तत्सर्ववंदेतिपृष्टोव्यासोनारदनारायणसंवादमुखेनसर्ववर्णयामासनवमस्कंधपर्यंतम् ॥ तथाऽष्टमस्कंधेएवान्यःप्रश्नःकृतोमन्वंतरेषुसर्वेषुयच्चरूपेणपूज्यते तत्सर्ववंदेतितस्योत्तरं नारदनारायणसंवादमुखेनैवदशमस्कंधेवदति तत्रनवमस्कंधांतेसर्वेमनवोभगवतीमेवाराध्यतत्तत्पदंप्राप्नुयुरिति

श्रीगणेशायनमः ॥ नारदउवाच ॥ नारायणधराधारसर्वपालनकारण ॥ भवतोदीरितंदेवीचरितंपापनाशनम् ॥१॥ मन्वंतरेषुसर्वेषुसादेवीयत्स्वरूपिणी॥ यदाकारेणकुरुतेप्रादुर्भावंमहेश्वरी ॥ २ ॥ तान्नःसर्वान्समाख्याहिदेवीमाहात्म्यमिश्रितान् ॥ यथाचयेनयेनेहपूजितासंस्तुतापिहि ॥३॥ मनोरथान्पूरयतिभक्तानांभक्तवत्सला ॥ तन्नःशुश्रूषमाणानांदेवीचरितमुत्तमम् ॥ ४ ॥ वर्णयस्वकृपासिंधोयेनाप्नोतिसुखंमहत् ॥ श्रीनारायणउवाच ॥ आकर्णयमहर्षेत्वंचरितंपापनाशनम् ॥ ५ ॥ भक्तानांभक्तिजननंमहासंपत्तिकारकम् ॥ जगद्योनिर्महातेजाब्रह्मालोकपितामहः ॥ ६ ॥ आविरासीन्नाभिपद्माद्देवदेवस्यचक्रिणः ॥ सचतुर्मुखआसाद्यप्रादुर्भावंमहामते ॥७॥ मनुंस्वायंभुवंनामजनयामासमानसात् ॥ समानसोमनुःपुत्रोब्रह्मणःपरमेष्ठिनः ॥ ८ ॥ शतरूपांचतत्पत्नींजज्ञेधर्मस्वरूपिणीम् ॥ समनुःक्षीरसिंधोश्चतीरेपरमपावने ॥ ९ ॥ देवीमाराधयामासमहाभाग्यफलप्रदाम् ॥ मूर्तिंचमृन्मयींतस्याविधायपृथिवीपतिः ॥ १० ॥ उपासतेस्मतांदेवींवाग्भवंसजपन्नरहः ॥ निराहारोजितश्वासोनियमव्रतकर्शितः ॥ ११ ॥ एकपादेनसंतिष्ठन्धरायामनिशंस्थिरः॥शतवर्षंजितःकामःक्रोधस्तेनमहात्मना॥ १२॥भेजेस्थावरतांदेव्याश्चरणौचिंतयन्हृदि॥तस्यतत्तपसादेवीप्रादुर्भूताजगन्मयी ॥१३॥उवाचवचनंदिव्यंवरंवरयभूमिप ॥ ततआनंदजनकंश्रुत्वावाक्यंमहीपतिः ॥ १४ ॥ वरयामासतान्हृत्स्थान्वरानमरदुर्लभान् ॥ मनुरुवाच ॥ जयदेविविशालाक्षिजयसर्वांतरस्थिते ॥ १५ ॥ मान्येपूज्येजगद्धात्रिसर्वमंगलमंगले ॥ त्वत्कटाक्षावलोकेनपद्मभूःसृजतेजगत् ॥ १६ ॥ वैकुंठःपालयत्येवहरःसंहरतेक्षणात् ॥ शचीपतिस्त्रिलोक्याश्चशासकोभवदाज्ञया ॥ १७ ॥ प्राणिनःशिक्षयत्येवदंडेनचपरेतराट् ॥ यादसामधिपःपाशीपालनंमादृशामपि ॥ ॥१८ ॥ कुरुतेसकुबेरोऽपिनिधीनांपतिरव्ययः ॥ हुतभुग्दैनर्ऋतोवायुरशिनःशेषएवच ॥१९॥ त्वदंशसंभवाएवत्वच्छक्तिपरिबृंहिताः ॥ अथापियदिमेदेविवरोदेयोऽस्तिसांप्रतम् ॥ २० ॥

प्रश्नबीजमुपलभ्यनारदःपृच्छति नारायणधराधारेति ॥ १ ॥ २ ॥ तान्नःसर्वानिति ॥ तान्सर्वानाकारानित्यर्थः ॥ किंचयेनयेनमंत्रेणस्तोत्रेणवापूजितासतीमनोरथान्पूरयतितदपिवदेत्याह यथाचयेनेति ॥ ३ ॥ शुश्रूषमाणानामितिबहुवचनंभक्त्यतिशयेनगौरवद्योतनार्थं भक्त्यतिशयद्योतनेएवपर्यवस्यति ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ मानसादंतःकरणात् ॥ ८ ॥ जज्ञेउत्पादितवान् ॥ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ मादृशामस्मदादीनाम् ॥ १८ ॥ १९ ॥ २० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रह्लाःमहांतः ॥ २१ ॥ २२ ॥ भवतांजायताम् ॥ २३ ॥ २४ ॥ इतिश्रीदेवीभागवततिलकेदशमस्कंधेप्रथमोऽध्यायः ॥ १ ॥ अष्टाविंशतिभिःपद्यैरर्धश्लोकाधिकैरथ ॥ वरंदत्वाभगवतीविंध्याद्रि

तदाप्रह्लाःसर्गकार्येविघ्नानश्यंतुमेशिवे ॥ वाग्भवस्याऽपिमंत्रस्ययेकेचिदुपसेविनः ॥ २१ ॥ तेषांसिद्धिःसत्वरापिकार्याणांजायतामपि ॥ येमंवादमिमंदे
विपठंतिश्रावयंतिच ॥ २२ ॥ तेषांलोकेभुक्तिमुक्तीसुलभेभवतांशिवे ॥ जातिस्मरत्वंभवतुवक्तृत्वंसौष्ठवंतथा ॥ २३ ॥ ज्ञानसिद्धिःकर्ममार्गसंसिद्धिरपि
चास्तुहि ॥ पुत्रपौत्रसमृद्धिश्चजायेदित्येवमेवचः ॥२४॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेप्रथमोऽध्यायः ॥ १ ॥ श्रीदेव्युवाच ॥ भूमिपालम
हाबाहोसर्वमेतद्भविष्यति ॥ यत्त्वयाप्रार्थितंतत्तेददामिमनुजाधिप ॥ १ ॥ अहंप्रसन्नादैत्येंद्रनाशनाऽमोघविक्रमा ॥ वाग्भवस्यजपेनैवतपसातेसुनिश्चित
म् ॥ २ ॥ राज्यंनिष्कंटकंतेऽस्तुपुत्रावंशकराअपि ॥ मयिभक्तिर्दृढावत्समोक्षांतेसत्पदेभवेत् ॥ ३ ॥ एवंवरान्महादेवीतस्मैदत्वामहात्मने ॥ पश्यत
स्तुमनोरेवजगामविंध्यपर्वतम् ॥ ४ ॥ योऽसौविंध्याचलोरुद्धःकुंभोद्भवमहर्षिणा ॥ भानुमार्गावरोधार्थंप्रवृत्तोगगनंस्पृशन् ॥ ५ ॥ साविंध्यवासिनीवि
ष्णोरनुजावरदेश्वरी ॥ बभूवपूज्यालोकानांसर्वेषांमुनिसत्तम॥६॥ऋषयऊचुः॥ कोसौविंध्याचलःसूतकिमर्थंगगनंस्पृशन् ॥ भानुमार्गावरोधंचकिमर्थंकृ
तवानसौ ॥७॥ कथंचमैत्रावरुणिःपर्वततंमहोन्नतम् ॥ प्रकृतिस्थंचकारेतिसर्वंविस्तरतोवद ॥८॥ नहितृप्यामहेसाधोत्वदास्यगलितामृतम् ॥ देव्याश्चरि
त्ररूपाख्यंपीत्वातृष्णाप्रवर्धते ॥ ९ ॥ सूतउवाच ॥ आसीद्विंध्याचलोनाममान्यःसर्वधराभृताम् ॥ महावनसमूहाढ्योमहापादपसंवृतः ॥१०॥ सुपु
ष्पितैरनेकैश्चलतागुल्मैस्तुसंवृतः ॥ मृगावराहामहिषाव्याघ्राःशार्दूलकाअपि ॥ ११ ॥ वानराःशशकाऋक्षाःशृगालाश्चसमंततः ॥ विचरंतिसदाहृष्टाः
पुष्टाएवमहोद्यमाः ॥ १२ ॥ नदीनदजलाक्रांतोदेवगंधर्वकिन्नरैः ॥ अप्सरोभिःकिंपुरुषैःसर्वकामफलद्रुमैः ॥ १३ ॥ एतादृशेविंध्यनगेकदाचित्पर्यटन्म
हीम् ॥ देवर्षिःपरमप्रीतोजगामस्वेच्छयामुनिः ॥ १४ ॥ तंदृष्ट्वासनगोमंक्षुतूर्णमुत्थायसंभ्रमात् ॥ पाद्यमर्घ्यंतथादत्वावरासनमथार्पयत् ॥ १५ ॥
सुखोपविष्टंदेवर्षिंप्रसन्नंनगऊचिवान् ॥ विंध्यउवाच ॥ देवर्षेकथ्यतांजातआगमःकुतउत्तमः ॥ १६ ॥ तवाऽऽगमनतोजातमनर्घ्यममंदिरम् ॥ तव
चंक्रमणंदेवाऽभयार्थंहियथारवेः ॥ १७ ॥ अपूर्वंयन्मनोवृत्तंतद्बूहिममनारद ॥ नारदउवाच ॥ ममाऽऽगमनमिंद्रारेजातंस्वर्णगिरेरथ ॥ १८ ॥ तत्रद
ष्टामयालोकाःशक्राग्नियमपाशिनाम् ॥ सर्वेषांलोकपालानांभवनानिसमंततः ॥ १९ ॥

चजगामह ॥ १ ॥ स्वायंभुवमनुस्तोत्रंश्रुत्वादेवीयदग्रेकृत
वतीतदाह श्रीदेव्युवाच भूमिपालेति ॥ १ ॥ २ ॥ सत्पदेब्रह्मपदे ॥ ३ ॥ ४ ॥ कुंभोद्भवोऽगस्तिः ॥ गगनमंतरिक्षम् ॥ स्पृशन्व्यापयन् ॥ ५ ॥ ६ ॥ ७ ॥ मैत्रावरुणिरगस्तिः ॥ प्रकृतिस्थं
यथापूर्वस्वभावस्थम् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ इंद्रोऽरिःशत्रुर्यस्यपर्वतपक्षच्छेदकत्वादिंद्रस्यपर्वतारित्वम् ॥ स्वर्णगिरेःसुमेरोः ॥ १८ ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयादृष्टानिविंध्यागनानाभोगप्रदानिच ॥ इतिचोक्काब्रह्मयोनिःपुनरुच्छ्वासमाविशत् ॥२०॥ उच्छ्वसंतंमुनिंदृष्ट्वापुनःपप्रच्छशैलराट् ॥ उच्छ्वासकारणंकिंतद्ब्रूहिदेवऋषेमम ॥ २१ ॥ इत्याकर्ण्यनगस्योक्तंदेवर्षिरमितद्युतिः ॥ अब्रवीच्छ्रूयतांवत्समोच्छ्वासस्यकारणम् ॥२२ ॥ गौरीगुरुस्तुहिमवाञ्छिवस्यश्वशुरःकिल ॥ संबंधित्वात्पशुपतेःपूज्यआसीत्क्षमाभृताम् ॥ २३ ॥ एवमेवचकैलासःशिवस्यावसथःप्रभुः॥पूज्यःपृथ्वीभृतांजातोलोकेपापौघदारणः ॥ २४ ॥ निषधःपर्वतोनीलोगंधमादनएवच ॥ पूज्याःस्वस्थानमासाद्यसर्वएवक्षमाभृतः ॥२५॥ यंपर्येतिचविश्वात्मासहस्रकिरणःस्वराट् ॥ सग्रहर्क्षगणोपेतःसोयंकनकपर्वतः॥२६॥आत्मानंमनुतेश्रेष्ठंवरिष्ठंचधराभृताम्॥ सर्वेषामहमेवाग्र्योनास्तिलोकेषुमत्समः॥२७॥एवंमानाभिमानंतस्मृत्वोच्छ्वासोमयोज्झितः ॥ अस्तुनैतावताकृत्यंतपोबलवतांनग ॥ २८ ॥ प्रसंगतोमयोक्तंतेगमिष्यामिनिजंगृहम् ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेद्वितीयोध्यायः॥२॥ ॥ सूतउवाच ॥ एवंसमुपदिश्यायंदेवर्षिःपरमःस्वराट् ॥ जगामब्रह्मणोलोकंस्वैरचारीमहामुनिः ॥१॥ गतेमुनिवरेविंध्यश्चिंतांलेभेनपायिनीम् ॥ नैवशांतिंसलेभेचसदांतःकृतशोचनः ॥२॥ कथंकिंत्वत्रमेकार्यंकथंमेरुंजयाम्यहम् ॥ नैवशांतिंलभेनाऽपिस्वास्थ्यंमेमानसेभवेत् ॥३॥ "धिगुत्साहंचमानंचधिङ्मेकीर्तिंचधिक्कुलम् ॥" धिग्बलंमेपौरुषंधिक्स्मृतंपूर्वैर्महात्मभिः ॥ एवंचिंतयमानस्यविंध्यस्यमनसिस्फुटम्॥४॥प्रादुर्भूतामतिःकार्यैकर्तव्येदोषकारिणी ॥ मेरुंप्रदक्षिणांकुर्वन्नित्यमेवदिवाकरः ॥५॥ सग्रहर्क्षगणोपेतःसदादृप्त्यत्ययंनगः ॥ तस्यमार्गस्यसंरोधंकरिष्यामिनिजैःकरैः ॥ ६ ॥ तदानिरुद्धोद्युमणिःपरिक्रामेत्कथंनगम् ॥ एवंमार्गेनिरुद्धेतुमयादिनकरस्यच ॥७॥ भग्नदर्पोदिव्यनगोभविष्यतिविनिश्चितम् ॥ एवंनिश्चित्यविंध्याद्रिःखंस्पृशन्ववृधेभुजैः ॥ ८ ॥ महोन्नतैःशृंगवरैःसर्वंव्याप्यव्यवस्थितः ॥ कदोदेष्यतिभास्वांस्तंरोधयिष्याम्यहंकदा ॥ ९ ॥

भिःश्लोकैरर्धश्लोकाधिकैरथ ॥ भानुमार्गनिरोधश्चविंध्येनकृतउच्यते ॥ १ ॥ नारदगमनोत्तरंजातंवृत्तमाह एवंसमुपदिश्येति ॥ १ ॥ चिंतांलेभेसजातीयस्यसुमेरोरभिमानासहिष्णुश्चिंतांप्राप्तवानित्यर्थः ॥ अंतरभ्यंतरेकृतंशोचनंशोकोयेनसः ॥ २ ॥ अत्रकिंकार्यंकथंवाकर्तव्यमित्यर्थः ॥३ ॥ ४ ॥ दोषकारिणीअपराधकारिणी ॥ ५ ॥ तेनकारणेनसदाऽयंनगोदृप्यतिगर्वंकरोतीत्यर्थः ॥ तथाचतस्यसूर्यस्यगतिनिरोधेमयाकृतेप्रदक्षिणासंभवादर्थात्तस्याभिमानोनष्टःस्यादित्यभिप्रायंविंध्यस्याह तस्यमार्गस्येति ॥ ६ ॥ ७ ॥ भुजैःशृंगैः ॥ ८ ॥ ९ ॥ ॥ ७ ॥ ॥७॥ ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥११॥ नलिनीसूर्यविकासिनी ॥ कुमुद्वतीचंद्रविकासिनी ॥१२॥ प्राह्णेति प्राह्णापराह्णमध्याह्नविभागेनहव्यंकव्यंचवर्धयन्सन्॥एवंक्रमेणवियोगिनींविरहिणींप्राचींदिशंतथाग्नेयींदिशंचसमाश्वा
स्याथभास्करःकृशानोरग्नेर्दिशंविहाययाम्यांयमसंबंधिनींदक्षिणदिशंगंतुंप्रतस्थेप्रस्थानकृतवानितिसमुदायार्थः॥कथंभूतांवियोगिनींचिरकालीनविरहात्कामिनीमिवज्वलंतीम्॥१३॥१४॥१५ ॥ नशे
कुरिति॥अश्वाइतिशेषः॥ व्यजिज्ञपद्विज्ञापितवान् ॥ १६ ॥ त्वदत्तांप्रदक्षिणांप्रेप्सुस्तस्याइच्छावानित्यर्थः॥अनूरुररुणः ॥ १७ ॥ १८ ॥ दैवचरित्रमेवोपपादयति राहुबाहुग्रहेति ॥ राहोर्बाहुभ्यांग्र

एवंसंचिंतयानस्यसाव्यतीयायशर्वरी ॥ प्रभातंविमलंजज्ञेदिशोवितिमिराःकरैः ॥ १० ॥ कुर्वन्सनिर्गतोभानुरुदयायोदयेगिरौ ॥ प्रकाशतेस्मविमलंन
भोभानुकरैःशुभैः ॥ ११ ॥ विकासंनलिनीभेजेमीलनंचकुमुद्वती ॥ स्वानिकार्याणिसर्वेचलोकाःसमुपतस्थिरे ॥ १२ ॥ हव्यंकव्यंभूतबलिंदेवानांचप्र
वर्धयन् ॥ प्राह्णापराह्णमध्याह्नविभागेनत्विषांपतिः ॥ १३ ॥ एवंप्राचींताथाग्नेयींसमाश्वास्यवियोगिनीम् ॥ ज्वलंतींचिरकालीनविरहादिवकामिनीम्
॥ १४ ॥ भास्करोऽथकृशानोश्चदिशंनूनंविहायच ॥ याम्यांगंतुंततस्तूर्णंप्रतस्थेकमलाकरः ॥ १५ ॥ नशेकुश्चाग्रतोगंतुंततोऽनूरुर्व्यजिज्ञपत् ॥ अनू
रुरुवाच ॥ भानोमानोन्नतोविंध्योनिरुध्यगगनंस्थितः ॥ १६ ॥ स्पर्धतेमेरुणाप्रेप्सुस्त्वदत्तांचप्रदक्षिणाम् ॥ सूतउवाच ॥ अनूरुवाक्यमाकर्ण्यसविता
ह्यासचिंतयन् ॥ १७ ॥ अहोगगनमार्गोऽपिरुध्यतेचाऽतिविस्मयः ॥ प्रायःशूरोनकिंकुर्यादुत्पथेवर्त्मनिस्थितः ॥ १८ ॥ निरुद्धोनोवाजिमार्गोदैवंहि
बलवत्तरम् ॥ राहुबाहुग्रहव्यग्रोयःक्षणंनावतिष्ठते ॥ १९ ॥ सचिरंरुद्धमार्गोऽपिकिंकरोतिविधिर्बली ॥ एवंचमार्गेसंरुद्धेलोकाःसर्वेचसेश्वराः ॥ २० ॥
नान्वविंदंतशरणंकर्तव्यंनान्वपद्यत ॥ चित्रगुप्तादयःसर्वेकालंजानंतिसूर्यतः ॥ २१ ॥ सरुद्धोविंध्यगिरिणाअहोदैवविपर्ययः ॥ यदानिरुद्धःसवितागिरि
णास्पर्धयातदा ॥ २२ ॥ नष्टःस्वाहास्वधाकारोनष्टप्रायमभूज्जगत् ॥ एवंचपाश्चिमालोकादाक्षिणात्यास्तथैवच ॥ २३ ॥ निद्रामीलितचक्षुष्कानिशा
मेवप्रपेदिरे ॥ प्रांचस्तथौत्तराहाश्चतीक्ष्णतापप्रतापिताः ॥ २४ ॥ मृतानष्टाश्वभग्नाश्चविनाशमभजन्प्रजाः ॥ हाहाभूतंजगत्सर्वंस्वधाकव्यविवर्जितम्
॥ २५ ॥ देवाःसेंद्राःसमुद्विग्नाःकिंकुर्मइतिवादिनः ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेदेवीमाहात्म्येतृतीयोध्यायः ॥ ३ ॥ ॥ सूतउवाच ॥
ततःसर्वेसुरगणामहेंद्रप्रमुखास्तदा ॥ पद्मयोनिंपुरस्कृत्यरुद्रंशरणमन्वयुः ॥ १ ॥ उपतस्थुःप्रणतिभिःस्तोत्रैश्चारुविभूतिभिः ॥ देवदेवंगिरिशयंशशिलो
लितशेखरम् ॥ २ ॥ देवाऊचुः ॥ जयदेवगणाध्यक्षउमालालितपत्कज ॥ अष्टसिद्धिविभूतीनांदात्रेभक्तजनायते ॥ ३ ॥

हेणआकलनेनेव्ययोपियःक्षणमात्रमपिनावतिष्ठतेस्थिरोभवतितादृशसइत्यन्वयः॥ किंकरोतिनकिंचित्कर्तुंसमर्थइत्यर्थः ॥ यतोविधिर्बलीभवति ॥ १९ ॥२० ॥ कोपिकर्तव्यंनान्वपद्यतनप्राप्तवान् ॥
॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ इतिश्रीदेवीभागवतेतिलकेदशमस्कंधेतृतीयोऽध्यायः ॥३॥ ॥ एकोनविंशतिश्लोकैर्देवदेवंवृषध्वजम् ॥ स्तुत्वासर्वेस्ववृत्तांतंकथयामासुरादरात् ॥१॥ एवंजगदु
पद्रवेसतितदनंतरंजातंवृत्तमाह ततःसर्वेइति ॥ १ ॥ २ ॥ पत्कजंकंजलंतस्माज्जातंकमलंकजंपच्छब्दःपदंघ्रिश्चरणोस्त्रियामितिकोशात्पादवाची चरणकमलमित्यर्थः ॥ ३ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महामायाविलसितस्थानायपरमात्मने ॥ वृषांकायामरेशायकैलासस्थितिशालिने ॥ ४ ॥ अर्हिर्बुध्न्यायमान्यायमनवेमानदायिने ॥ अजायबहुरूपा यस्वात्मारामायशंभवे ॥ ५ ॥ गणनाथायदेवायगिरिशायनमोस्तुते ॥ महाविभूतिदात्रेतेमहाविष्णुस्तुतायच ॥६॥ विष्णुहृत्कंजवासायमहायोगर तायच ॥ योगगम्यायायोगाययोगिनांपतयेनमः ॥ ७ ॥ योगीशायनमस्तुभ्ययंयोगानांफलदायिने ॥ दीनदानपरायापिदयासागरमूर्तये ॥ ८ ॥ आर्तिप्रशमनायोग्रवीर्यायगुणमूर्तये ॥ वृषध्वजायकालायकालकालायतेनमः ॥ ९ ॥ सूतउवाच ॥ एवंस्तुतःसदेवेशोयज्ञभुग्भिर्वृषध्वजः ॥ प्राहगंभीरया वाचाप्रहसन्विबुधर्षभान् ॥ १० ॥ श्रीभगवानुवाच ॥ प्रसन्नोऽहंदिविषदःस्तोत्रेणोत्तमपूरुषाः ॥ मनोरथंपूरयामिसर्वेषांदेवतर्षभाः ॥११॥ देवाऊचुः ॥ सर्वदेवेशगिरिशशशिमौलिविराजित ॥ आर्तानांशंकरस्त्वंचशंविधेहिमहाबल ॥ १२ ॥ पर्वतोविंध्यनामास्तिमेरुद्वेष्टामहोन्नतः ॥ भानुमार्गनिरोद्धा हिसर्वेषांदुःखदोऽनघ ॥ १३ ॥ तद्वृद्धिस्तंभयेशानसर्वकल्याणकृद्भव ॥ भानुसंचाररोधेनकालज्ञानंकथंभवेत् ॥ १४ ॥ नष्टस्वाहास्वधाकारेलोकेकः शरणंभवेत् ॥ अस्माकंचभयार्तानांभवानेवहिदृश्यते ॥ १५ ॥ दुःखनाशकरोदेवप्रसीदगिरिजापते ॥ श्रीभगवानुवाच ॥ नाऽस्माकंशक्तिरस्तीहतद्वृ द्धिस्तंभनेसुराः ॥ १६ ॥ इममेवचवंदामोभगवंतंरमाधवम् ॥ सोऽस्माकंप्रभुरात्माचपूज्यःकारणरूपधृक् ॥ १७ ॥ गोविंदोभगवान्विष्णुःसर्वकारण कारणः ॥ तंगत्वाकथयिष्यामःसदुःखांतोभविष्यति ॥ १८ ॥ इत्येवमाकर्ण्यगिरीशभाषितंदेवाश्चसेंद्राःसपयोजसंभवाः ॥ रुद्रंपुरस्कृत्यचवेपमानावै कुंठलोकंप्रतिजग्मुरंजसा ॥ १९ ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ सूतउवाच ॥ तेगत्वादेवदेवेशंरमानाथंजगद्गुरु म् ॥ विष्णुंकमलपत्राक्षंददृशुःप्रभयान्वितम् ॥ १ ॥ स्तोत्रेणतुष्टुवुर्भक्त्यागद्गदस्वरसत्कृताः ॥ देवाऊचुः ॥ जयविष्णोरमेशाऽद्यमहापुरुषपूर्वज ॥ २ ॥ दैत्यारेकामजनकसर्वकामफलप्रद ॥ महावराहगोविंदमहायज्ञस्वरूपक ॥ ३ ॥ महाविष्णोध्रुवेशाऽऽद्यजगदुत्पत्तिकारण ॥ मत्स्यावतारवेदानामुद्धा राधाररूपक ॥ ४ ॥ सत्यव्रतधराधीशमत्स्यरूपायतेनमः ॥ जयाऽकूपारदैत्योरेसुरकार्यसमर्पक ॥ ५ ॥ अमृताप्तिकरेशानकूर्मरूपायतेनमः ॥ जयाऽऽदिदैत्यनाशार्थमादिसूकररूपधृक् ॥ ६ ॥ मह्युद्धारकृतोद्योगकोलरूपायतेनमः ॥ नारसिंहंवपुःकृत्वामहादैत्यंददारयः ॥ ७ ॥

सप्तविंशतिपद्यैर्वाप्यर्धश्लोकाधिकैरथ ॥ देवादिभिःकृतंस्तोत्रंमहाविष्णोरितीर्यते ॥ १ ॥ शिववाक्यश्रवणोत्तरंदेवावैकुंठंगताइत्याह तेगत्वेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ अकू पारदयासमुद्र कूर्मरूप ॥ ५ ॥ ६ ॥ कोलरूपायवराहरूपाय ॥ ७ ॥

॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करजैर्नखैः ॥ ८ ॥ सहस्रकरःकार्तवीर्यः ॥ ९ ॥ जामदग्न्यायपरशुरामाय ॥ पौलस्त्यरावणः ॥ १० ॥ ११ ॥ १२ ॥ दुष्टयज्ञाअविधियज्ञाः ॥ १३ ॥ १४ ॥ १५ ॥ नारीजलात्मसुयेनरूपं

करजैर्वरदप्तांगंतस्मैनृहरयेनमः ॥ वामनंरूपमास्थायत्रैलोक्यैश्वर्यमोहितम् ॥ ८ ॥ बलिंसंछलयामासतस्मैवामनरूपिणे ॥ दुष्टक्षत्रविनाशायसहस्र करशत्रवे ॥ ९ ॥ रेणुकागर्भजातायजामदग्न्यायतेनमः ॥ दुष्टराक्षसपौलस्त्यशिरश्छेदपटीयसे ॥१०॥ श्रीमद्दाशरथेतुभ्यंनमोऽनंतक्रमायच ॥ कंसदुर्योध नाद्यैश्चदैत्यैःपृथ्वीशलांछनैः ॥ ११ ॥ भाराक्रांतांमहींयोसावुज्जहारमहाविभुः ॥ धर्मसंस्थापयामासपापंकृत्वासुदूरतः ॥ १२ ॥ तस्मैकृष्णायदेवाय नमोस्तुबहुधाविभो ॥ दुष्टयज्ञविघातायपशुहिंसानिवृत्तये ॥ १३ ॥ बौद्धरूपंदधौयोसौतस्मैदेवायतेनमः ॥ म्लेच्छप्रायेऽखिलेलोकेदुष्टराजन्यपी डिते ॥१४॥ कल्किरूपंसमादध्यौदेवदेवायतेनमः ॥ दशावतारास्तेदेवभक्तानांरक्षणायवै ॥ १५ ॥ दुष्टदैत्यविघातायतस्मात्त्वंसर्वदुःखहृत् ॥ जयभक्ता र्तिनाशायधृतंनारीजलात्मसु ॥ १६ ॥ रूपंयेनत्वयादेवकोऽन्यस्त्वत्तोदयानिधिः ॥ इत्येवंदेवदेवेशंस्तुत्वाश्रीपीतवाससम् ॥१७॥ प्रणेमुर्भक्तिसहिताः साष्टांगंविबुधर्षभाः ॥ तेषांस्तवंसमाकर्ण्यदेवःश्रीपुरुषोत्तमः ॥ १८ ॥ उवाचविबुधान्सर्वान्हर्षयञ्छ्रीगदाधरः ॥ श्रीभगवानुवाच ॥ प्रसन्नोऽस्मिस्त वेनाऽहंदेवास्तापंविमुंचथ ॥ १९ ॥ भवतांनाशयिष्यामिदुःखंपरमदुःसहम् ॥ वृणुध्वंचवरंमत्तोदेवाःपरमदुर्लभम् ॥ २० ॥ ददामिपरमप्रीतःस्तव स्याऽस्यप्रसादतः ॥ यएतत्पठतेस्तोत्रंकल्यउत्थायमानवः ॥ २१ ॥ मयिभक्तिंपरांकृत्वानतंशोकःस्पृशेत्कदा ॥ अलक्ष्मीःकालकर्णीचनाक्रामेत्तद्गृहंसु राः ॥ २२ ॥ नोपसर्गानवेतालानग्रहाब्रह्मराक्षसाः ॥ नरोगावातिकाःपैत्ताःश्लेष्मसंभविनस्तथा ॥ २३ ॥ नाऽकालमरणंतस्यकदापिचभविष्यति ॥ संततिश्चिरकालस्थाभोगाःसर्वेसुखादयः ॥ २४ ॥ संभविष्यंतितन्मर्त्यगृहेयस्तोत्रपाठकः ॥ किंपुनर्बहुनोक्तेनस्तोत्रंसर्वार्थसाधकम् ॥ २५ ॥ एतस्यपठ नान्नृणांभुक्तिमुक्तीनदूरतः ॥ देवाभवत्सुयद्दुःखंकथ्यतांतदसंशयम् ॥ २६ ॥ नाशयामिनसंदेहश्चाऽत्रकार्योऽणुरेवच ॥ एवंश्रीभगवद्वाक्यंश्रुत्वासर्वेदि वौकसः ॥ २७ ॥ प्रसन्नमनसःसर्वेपुनरूचुर्वृषाकपिम् ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेपंचमोऽध्यायः ॥ ५ ॥ ॥ सूतउवाच ॥ श्रीशस्यवच नादेवाःसंतुष्टाःसर्वएवहि ॥ प्रसन्नमनसोभूत्वापुनरेनंसमूचिरे ॥ १ ॥ देवाऊचुः ॥ देवदेवमहाविष्णोसृष्टिस्थित्यंतकारण ॥ विष्णोविंध्यनगोऽर्कस्यमा र्गरोधंकरोतिहि ॥ २ ॥ तेनभानुविरोधेनसर्वएवमहाविभो ॥ अलब्धभोगभागाहिकिंकुर्मःकुत्रयामहि ॥ ३ ॥

धृतमित्यन्वयः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥२५ ॥ २६ ॥ अणुमात्रमपिसंदेहोनास्तीत्यर्थः ॥ २७ ॥ वृषाकपिंविष्णुम् ॥ इतिश्रीदेवीभागवततिलकेद शमस्कंधेपंचमोऽध्यायः ॥ ५ ॥ ॥ सप्तविंशतिपद्यैर्वाप्यर्धश्लोकाधिकैरथ ॥ देवैःसंप्रार्थितोगस्तिर्विंध्याद्रेर्वृद्धिकुंठने ॥ १ ॥ विष्णुवाक्यश्रवणानंतरंजातंवृत्तमाह श्रीशस्येति ॥ १ ॥ २ ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूजकः अतएवभगवत्याअगस्त्योपासितालोपामुद्रोपासितेतिनामब्रह्मांडपुराणेतंत्रेषुप्रसिद्धमेवैतत् ॥ ४ ॥ तत्तेजोवंचकोविंध्याद्विवृद्धिखंडकः ॥ ५ ॥ निःश्रेयसोमोक्षस्यपदींस्थानम् ॥ ६ ॥ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ यस्याऽगस्तिनक्षत्रस्योदये ॥ १५ ॥ काशपुष्पेति ॥ अगस्तिनक्षत्रस्योदयेकाशपुष्पंमुनिपुष्पम् ॥ भाषायांयस्याऽगस्तिपुष्पमिति

श्रीभगवानुवाच ॥ याकर्त्रीसर्वजगतामाद्याचकुलवर्धनी ॥ देवीभगवतीतस्याःपूजकःपरमद्युतिः ॥ ४ ॥ अगस्त्योमुनिवर्योऽसौवाराणस्यांसमासते ॥ तत्तेजोवंचकोऽगस्त्योभविष्यतिसुरोत्तमाः ॥ ५ ॥ तंप्रसाद्यद्विजवरमगस्त्यंपरमौजसम् ॥ याचध्वंविबुधाःकाशींगत्वानिःश्रेयसःपदीम् ॥ ६ ॥ सूतउवाच ॥ एवंसमुपदिष्टास्तेविष्णुनाविबुधोत्तमाः ॥ प्रतीताःप्रणताःसर्वेजग्मुर्वाराणसींपुरीम् ॥ ७ ॥ क्षणेनविबुधश्रेष्ठागत्वाकाशीपुरींशुभाम् ॥ मणिकर्णींसमाहृत्यसचैलंभक्तिसंयुताः ॥ ८ ॥ संतर्प्यदेवांश्चपितॄन्दत्त्वादानंविधानतः ॥ आगत्यमुनिवर्यस्यचाऽऽश्रमंपरमंमहत् ॥ ९ ॥ प्रशांतश्वापदाकीर्णनानापादपसंकुलम् ॥ मयूरैःसारसैर्हंसैश्चक्रवाकैरुपाश्रितम् ॥ १० ॥ महावराहैःकोलैश्चव्याघ्रैःशार्दूलकैरपि ॥ मृगैरुरुभिरत्यर्थखड्गैःशरभकैरपि ॥ ॥ ११ ॥ समाश्रितंपरमयालक्ष्म्यामुनिवरंतदा ॥ दंडवत्पतिताःसर्वेप्रणेमुश्चपुनःपुनः ॥१२॥ जयद्विजगणाधीशमान्यपूज्यधरासुर ॥ वातापीबलनाशायनमस्तेकुंभयोनये ॥ १३ ॥ लोपामुद्रापतेश्रीमन्मित्रावरुणसंभव ॥ सर्वविद्यानिधेऽगस्त्यशास्त्रयोनेनमोस्तुते ॥ १४ ॥ यस्योदयेप्रसन्नानिभवंत्युज्ज्वलभांज्यपि ॥ तोयानितोयराशीनांतस्मैतुभ्यंनमोऽस्तुते ॥ १५ ॥ काशपुष्पविकासायलंकावासप्रियायच ॥ जटामंडलयुक्तायसशिष्यायनमोऽस्तुते ॥ १६ ॥ जयसर्वामरस्तव्यगुणराशेमहामुने ॥ वरिष्ठायचपूज्यायसस्त्रीकायनमोऽस्तुते ॥ १७ ॥ प्रसादःक्रियतांस्वामिन्वयंत्वांशरणंगताः ॥ दुस्तराच्छैलजाद्दुःखात्पीडिताःपरमद्युते ॥ १८ ॥ इत्येवंसंस्तुतोऽगस्त्योमुनिःपरमधार्मिकः ॥ प्राहप्रसन्नयावाचाविहसन्द्विजसत्तमः ॥१९॥मुनिरुवाच॥ भवंतःपरमश्रेष्ठादेवास्त्रिभुवनेश्वराः ॥ लोकपालामहात्मानोनिग्रहानुग्रहक्षमाः ॥ २० ॥ योऽमरावत्यधीशानःकुलिशंयस्यचाऽऽयुधम् ॥ सिद्ध्यष्टकंच यद्वारिसशक्रोमरुतांपतिः ॥ २१ ॥ वैश्वानरःकृशानुर्हिहव्यकव्यवहोऽनिशम् ॥ मुखंसर्वामराणांहिसोऽग्निःकिंतस्यदुष्करम् ॥ २२ ॥ रक्षोगणाधिपोभामःसर्वेषांकर्मसाक्षिकः ॥ दंडव्यग्रकरोदेवःकिंतस्याऽसुकरंसुराः ॥ २३ ॥ तथाऽपियदिदेवेशाःकार्यमच्छक्तिसिद्धिभृत् ॥ अस्तिचेदुच्यतांदेवाःकरिष्यामिनसंशयः ॥ २४ ॥ एवंमुनिवरेणोक्तंनिशम्यविबुधर्षभाः ॥ प्रतीताःप्रणयोद्विग्नाःकार्यंनिजगदुर्निजम् ॥ २५ ॥

संज्ञाभवतितत्काशपुष्पं तस्यविकासोभवति ॥ ततोहेतोःकाशपुष्पविकासाय ॥ लंकायांवासेगमनमभिलषितंयस्यसरामचंद्रोलंकावासस्तस्यप्रियायगुरवेशिवगीतोपदेशशिवमंत्रोपदेशकर्त्रे ॥ शिवगीतायांस्पष्टमेतत् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ भामोदीप्तिमान् ॥ २३ ॥ २४ ॥ प्रतीतात्तुष्टाः ॥ २५ ॥ ॥४॥ ॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ २६ ॥ २७ ॥ इतिश्रीदेवीभागवततिलकेदशमस्कंधेषष्ठोऽध्यायः ॥६॥ ॥ षड्विंशतिमहापद्यैरर्धश्लोकाधिकैरथ ॥ मुनिनाविंध्यवृद्धेश्वकुंठनंकृतमुच्यते ॥१॥ देववाक्यंश्रुत्वामुनिर्यत्कृतवांस्त
दाह सूतउवाच इतिवाक्यमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ एतस्यविघ्नस्यांकंकारणमितिचेदधुनैवतत्कारणंस्मृतमित्याह आज्ञातमिति ॥ ५ ॥ ६ ॥ ७ ॥ कालराजंकालभैरवम् ॥ ८॥ ९ ॥

महर्षेर्विंध्यगिरिणानिरुद्धोऽर्कविनिर्गमः ॥ त्रैलोक्यंतेनसंविष्टंहाहाभूतमचेतनम् ॥ २६ ॥ तद्वर्द्धिस्तंभयमुनेनिजयातपसःश्रिया ॥ भवतस्तेजसाऽग
स्त्यनूनंनम्रोभविष्यति ॥ २७ ॥ एतदेवाऽस्मदीयंचकार्यंकर्तव्यमस्तिहि ॥ इतिश्रीदेवीभागवतेमहा०दशमस्कंधेषष्ठोध्यायः ॥ ६ ॥ ॥ सूतउवाच ॥
इतिवाक्यंसमाकर्ण्यविबुधानांद्विजोत्तमः ॥ करिष्येकार्यमेतद्वःप्रत्युवाचततोमुनिः॥ १॥ अंगीकृतेतदाकार्येमुनिनाकुंभजन्मना ॥ देवाःप्रमुदिताःसर्वेबभू
वुर्द्विजसत्तमाः ॥ २ ॥ तेदेवाःस्वानिधिष्ण्यानिभेजिरेमुनिवाक्यतः ॥ पत्नींमुनिवरःश्रीमानुवाचनृपकन्यकाम् ॥ ३ ॥ अयेनृपसुतेप्राप्तोविघ्नोऽनर्थस्य
कारकः ॥ भानुमार्गनिरोधेनकृतोविंध्यमहीभृता ॥ ४ ॥ आज्ञातंकारणंतच्चस्मृतंवाक्यंपुरातनम् ॥ काशीमुद्दिश्ययद्गीतंमुनिभिस्तत्त्वदर्शिभिः ॥ ५ ॥
अविमुक्तंनमोक्तव्यंसर्वथैवमुमुक्षुभिः ॥ किंतुविघ्नाभविष्यंतिकाश्यांनिवसतांसताम् ॥ ६ ॥ सोंऽतरायोमयाप्राप्तःकाश्यांनिवसताप्रिये ॥ इत्येवमु
क्काभार्यांतांमुनिःपरमतापनः ॥ ७ ॥ मणिकर्ण्यांसमाप्लुत्यदृष्ट्वाविश्वेश्वरंविभुम् ॥ दंडपाणिंसमभ्यर्च्यकालराजंसमागतः ॥ ८ ॥ कालराजमहाबाहो
भक्तानांभयहारक ॥ कथंदूरयसेपुर्याःकाशीपुर्यास्त्वमीश्वरः ॥ ९ ॥ त्वंकाशीवासिविघ्नानांनाशकोभक्तरक्षकः ॥ मांकिंदूरयसेस्वामिन्भक्तार्तिविनिवा
रक ॥ १० ॥ परापवादोनोक्तोमेनपैशुन्यंनचानृतम् ॥ केनकर्मविपाकेनकाश्यादूरंकरोषिमाम् ॥११॥ एवंप्रार्थ्यचतंकालनाथंकुंभोद्भवोमुनिः ॥ जगा
मसाक्षिविघ्नेशंसर्वविघ्ननिवारणम् ॥१२॥ तंदृष्ट्वाऽभ्यर्च्यसंप्रार्थ्यततःपुर्याविनिर्गतः ॥ लोपामुद्रापतिःश्रीमानगस्त्योदक्षिणांदिशम् ॥१३॥ काशीविर
हसंतप्तोमहाभाग्यनिधिर्मुनिः ॥ संस्मृत्यानुक्षणंकाशींजगामसहभार्यया ॥१४॥ तपोयानमिवाऽऽरुह्यनिमिषार्धेनवैमुनिः ॥ अग्रेददर्शतंविंध्यंरुद्धांबरम
थोन्नतम् ॥ १५ ॥ चकंपेचाचलस्तूर्णंदृष्ट्वैवाग्रेस्थितंमुनिम् ॥ गिरिःखर्वतरोभूत्वाविवक्षुरवनीमिव ॥१६॥ दंडवत्पतितोभूमौसाष्टांगंभक्तिभावितः ॥तंदृष्ट्वा
नम्रशिखरंविंध्यंनाममहागिरिम्॥१७॥प्रसन्नवदनोऽगस्त्योमुनिर्विंध्यमथाऽब्रवीत्॥वत्सैवंतिष्ठतावत्त्वंयादवदागम्यतेमया॥१८॥अशक्तोऽहंगंडशैलारोह
णेतवपुत्रक॥एवमुक्तामुनिर्याम्यदिशंप्रतिगमोत्सुकः॥१९॥आरुह्यतस्यशिखराण्यवारुहदनुक्रमात् ॥गतोयाम्यदिशंचापिश्रीशैलंप्रेक्ष्यवर्त्मनि ॥ २० ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ तपएवयोगएवयानंयस्य ॥ योगशक्त्याक्षणार्धेनगतइत्यर्थः ॥ १५ ॥ किमर्थंखर्वतरोनम्रतरोजातइतिचेत्तत्रोत्प्रेक्षामाह विवक्षुरवनीमिवेति ॥ अवनींपृ
थिवींकंचिद्रहस्यंकर्णेविवक्षुर्वक्तुमिच्छुरिव ॥ अतिशयेननम्रोजातइतितात्पर्यम् ॥ १६ ॥ तदेवाह दंडवदिति ॥ १७॥ १८ ॥ १९ ॥ अवारुहत्पृथिवींप्रत्यवातरदित्यर्थः ॥ २० ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मलयाचलमासाद्यतत्राऽऽश्रमपरोऽभवत् ॥ सापिदेवीतत्रविंध्यमागतामनुपूजिता ॥ २१ ॥ लोकेषुप्रथितांविंध्यवासिनीतिचशौनक ॥ सूतउवाच ॥ ए
तच्चरित्रंपरमंशत्रुनाशनमुत्तमम् ॥ २२ ॥ अगस्त्यविंध्यनगयोराख्यानंपापनाशनम् ॥ राज्ञांविजयदंतच्चद्विजानांज्ञानवर्धनम् ॥ २३ ॥ वैश्यानांधान्यध
नदंशूद्राणांसुखदंतथा ॥ धर्मार्थीधर्ममाप्नोतिधनार्थीधनमाप्नुयात् ॥ २४ ॥ कामानवाप्नुयात्कामीभक्त्याचास्यसकृच्छ्रवात् ॥ एवंस्वायंभुवमनुर्देवीमा
राध्यभक्तितः ॥ २५ ॥ लेभेराज्यंधरायाश्चनिजमन्वंतराश्रयम् ॥२६ ॥ इत्येतद्वर्णितंसौम्यमयामन्वंतराश्रितम् ॥ आद्यंचरित्रंश्रीदेव्याःकिंपुनःकथया
मिते ॥२७॥ इतिश्रीदेवीभागवतेमहा०दशमस्कंधेसप्तमोध्यायः ॥७॥ ॥ शौनकउवाच ॥ आद्योमन्वंतरःप्रोक्तोभवताचायमुत्तमः ॥ अन्येषामुद्भवंब्रूहि
मनूनांदिव्यतेजसाम् ॥ १ ॥ सूतउवाच ॥ एवमाद्यस्यचोत्पत्तिंश्रुत्वास्वायंभुवस्यहि ॥ अन्येषांक्रमशस्तेषांसंभूतिंपरिपृच्छति ॥ २॥ नारदःपरमोज्ञा
नीदेवीतत्त्वार्थकोविदः ॥ नारदउवाच ॥ मेमनूनांसमाख्याहिसूत्पत्तिंचसनातन ॥ ३ ॥ नारायणउवाच ॥ प्रथमोऽयंमनुःस्वायंभुवउक्तोमहामुने ॥ देव्या
राधनतोयेनप्राप्तंराज्यमकंटकम् ॥४॥ प्रियव्रतोत्तानपादौमनुपुत्रौमहौजसौ ॥ राज्यपालनकर्तारौविख्यातौवसुधातले ॥५॥ द्वितीयश्चमनुःस्वारोचिषउ
क्तोमनीषिभिः ॥ प्रियव्रतसुतःश्रीमानप्रमेयपराक्रमः ॥६॥ सस्वारोचिषनामापिकालिंदीकूलतोमनुः॥निवासंकल्पयामाससर्वसत्त्वप्रियंकरः ॥७॥ जीर्णप
त्राशनोभूत्वातपःकर्तुमनुव्रतः ॥ देव्यामूर्तिंमृन्मयींचपूजयामासभक्तितः ॥८॥ एवंद्वादशवर्षाणिवनस्थस्यतपस्यतः ॥ देवीप्रादुरभूत्तातसहस्रार्कसमद्यु
तिः ॥९॥ ततःप्रसन्नादेवेशीस्तवराजेनसुव्रता ॥ददौस्वारोचिषायैवसर्वमन्वंतराश्रयम् ॥१०॥ आधिपत्यंजगद्धात्रीतारिणीतिप्रथामगात् ॥ एवंस्वारोचि
षमनुस्तारिण्याराधनात्ततः ॥११ ॥ आधिपत्यंचलेभेससर्वारातिविवर्जितम् ॥ धर्मसंस्थाप्यविधिवद्राज्यंपुत्रैःसमंविभुः ॥१२ ॥ भुक्त्वाजगामस्वर्लोकंनि
जमन्वंतराश्रयात् ॥ तृतीयउत्तमोनामप्रियव्रतसुतोमनुः॥ १३ ॥ गंगाकूलेतपस्तप्त्वावाग्भवंसंजपन्नहः ॥वर्षाणित्रीण्युपवसन्देव्यनुग्रहमाविशत्॥१४॥
स्तुत्वादेवींस्तोत्रवरैर्भक्तिभावितमानसः ॥ राज्यंनिष्कंटकंलेभेसंततिंचिरकालिकीम् ॥ १५ ॥

शमेवनारदेननारायणंप्रतिपृष्टमित्याह एवमाद्यस्येति ॥ आद्यस्यादिभूतस्यस्वायंभुवमनोः ॥ परिपृच्छतिनारदइत्यन्वयः ॥२॥ सनातनहेनारायण ॥३॥४॥५॥६॥कूलतःकूले॥७॥८॥९॥१०॥ ता
रिणीति॥ यादशमहाविद्यासुमध्येतारिणीतिप्रथामगात्सास्वारोचिषायमन्वंतराधिपत्यंददावित्यन्वयः ॥ तारामहाविद्योपासकोऽयमितिभावः ॥११॥१२॥तृतीयोमनुरित्यन्वयः ॥१३॥१४॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १६ ॥ चतुर्थोमनुरित्यन्वयः ॥ १७ ॥ कामराजकूटंकामबीजम् ॥ तच्चदक्षिणामूर्तिसंहितायांकामेश्वर्याउक्तमस्तीतिकामेश्वर्याअयमुपासकइतिभावः ॥ १८ ॥ १९ ॥ २० ॥ अंबरंपरलोकम् ॥
तामसानुजः पूर्वोक्तोयःप्रियव्रतसुतस्तामसस्तस्यानुजः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ इतिश्रीदेवीभागवततिलकेदशमस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ एकोनत्रिंशत्पद्यैस्तुवाक्षुषस्यमनोःकथा ॥

राज्योत्थान्यानिसौख्यानिभुक्त्वाधर्मान्युगस्यच ॥ सोप्याजगामपदवींराजर्षिवरभाविताम् ॥ १६ ॥ चतुर्थस्तामसोनामप्रियव्रतसुतोमनुः ॥ नर्मदादक्षिणेकूलेसमाराध्यजगन्मयीम् ॥ १७ ॥ महेश्वरींकामराजकूटजापपरायणः ॥ वासंतेशारदेकालेनवरात्रसपर्यया ॥ १८ ॥ तोषयामासदेवेशींजलजाक्षीमनूपमाम् ॥ तस्याःप्रसादमासाद्यनत्वास्तोत्रैरनुत्तमैः ॥ १९ ॥ अकंटकंमहद्राज्यंबुभुजेगतसाध्वसः ॥ पुत्रान्बलोद्धताञ्छूरान्दशवीर्यनिकेतनान् ॥ ॥ २० ॥ उत्पाद्यनिजभार्यायांजगामांबरमुत्तमम् ॥ पंचमोमनुराख्यातोरैवतस्तामसानुजः ॥ २१ ॥ कालिंदीकूलमाश्रित्यजजापकामसंज्ञकम् ॥ बीजंपरमवाग्दर्पदायकंसाधकाश्रयम् ॥ २२ ॥ एतदाराधनादापस्वाराज्यर्द्धिमनुत्तमाम् ॥ बलमप्रहतंलोकेसर्वसिद्धिविधायकम् ॥ २३ ॥ संततिंचिरकालीनांपुत्रपौत्रमयींशुभाम् ॥ धर्मान्व्यस्यव्यवस्थाप्यविषयानुपभुज्यच ॥२४॥ जगामाऽप्रतिमःशूरोमहेंद्रालयमुत्तमम् ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेऽष्टमोऽध्ययः ॥ ८ ॥ ॥ श्रीनारायणउवाच ॥ अथातःश्रूयतांचित्रंदेवीमाहात्म्यमुत्तमम् ॥ अंगपुत्रेणमनुनायथाऽऽप्तंराज्यमुत्तमम् ॥ १ ॥ अंगस्यराज्ञःपुत्रोऽभूच्चाक्षुषोमनुरुत्तमः ॥ षष्ठःसुपुलहंनामब्रह्मर्षिशरणंगतः ॥२॥ ब्रह्मर्षेत्वामहंप्राप्तःशरणंप्रणतार्तिहन् ॥ शाधिमांकिंकरंस्वामिन्येनाऽहंप्राप्नुयांश्रियम् ॥ ३ ॥ मेदिन्याश्चाधिपत्यंमेस्याद्यथावदखंडितम् ॥ अव्याहतंभुजबलंशस्त्रास्त्रनिपुणंक्षमम् ॥ ४ ॥ संततिश्चिरकालीनाऽप्यखंडंवयउत्तमम् ॥ अंतेऽपवर्गलाभश्चस्यात्तथोपदिशाऽद्यमे ॥ ५ ॥ इत्येवंवचनंतस्यमनोःकर्णपथेऽभवत् ॥ प्रत्युवाचमुनिःश्रीमान्देव्याःसंराधनंपरम् ॥ ६ ॥ राजन्नाकर्णयवचोममश्रोत्रसुखंमहत् ॥ शिवामाराधयाऽद्यत्वंतत्प्रसादादिदंभवेत् ॥ ७ ॥ चाक्षुषउवाच ॥कीदृगाराधनंदेव्यास्तस्याःपरमपावनम् ॥ केनाकारेणकर्तव्यंकारुण्याद्वक्तुमर्हसि ॥ ८ ॥ मुनिरुवाच ॥ राजन्नाकर्ण्यतांदेव्याःपूजनंपरमव्ययम् ॥ वाग्भवंबीजमव्यक्तंसंजप्यमनिशंतथा ॥ ९ ॥ त्रिकालंसंजपन्मर्त्योभुक्तिमुक्तीलभेत्तुहि ॥ नबीजंवाग्भवादन्यदस्तिराजन्यनंदन ॥ १० ॥ जपात्सिद्धिकरंवीर्यबलवृद्धिकरंपरम् ॥ एतस्यजापात्पाद्मोऽपिसृष्टिकर्तामहाबलः ॥ ११ ॥ विष्णुर्यज्जपतःसृष्टिपालकःपरिकीर्तितः ॥ महेश्वरोऽपिसंहर्तायज्जपाद्भवन्नृप ॥१२॥ लोकपालास्तथाऽन्येऽपिनिग्रहानुग्रहक्षमाः ॥ यदाश्रयादभूवंस्तेबलवीर्यमदोद्धताः ॥ १३ ॥

यथावद्वर्ण्यतेयत्रदेवीमाहात्म्यविस्तरः ॥ १ ॥ अवशिष्टषष्टमनोःकथामाह अथातइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ अपवर्गलाभोमोक्षलाभोंऽतेस्यादित्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥
वाग्भवंबीजंमहासरस्वतीदेवता ॥ १० ॥ पाद्मःपद्मसंभवोब्रह्मा ॥ ११ ॥ १२ ॥ १३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १४ ॥ १५ ॥ १६ ॥ तृतीयेऽब्देतृतीयेवर्षे ॥ १७ ॥ १८ ॥ १९ ॥ ईश्वरीमहासरस्वती ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ इतिश्रीदेवीभागवतति
लकेदशमस्कंधेनवमोऽध्यायः ॥ ९ ॥ ॥७॥ ॥ पंचविंशतिभिःश्लोकैरर्धश्लोकाधिकैरथ ॥ मनोःसावर्णिसंज्ञस्यकथानकमिहोच्यते ॥ १ ॥ सप्तमाष्टममन्वोःकथामाह सप्तमइति ॥ १ ॥ २ ॥

एवंत्वमपिराजन्यमहेशींजगदंबिकाम् ॥ समाराध्यमहर्धिंचलप्स्यसेऽचिरकालतः ॥ १४ ॥ एवंसमुनिवर्येणपुलहेनप्रबोधितः ॥ अंगपुत्रस्तपस्तप्तुंज
गामविरजांनदीम् ॥ १५ ॥ सचतेपेतपस्तीव्रंवाग्भवस्यजपेरतः ॥ बीजस्यपृथिवीपालःशीर्णपर्णाशनोविभुः ॥ १६ ॥ प्रथमेऽब्देपल्लवाशोद्वितीयेतोय
भक्षणः ॥ तृतीयेऽब्देपवनभुक्तस्थौस्थाणुरिवाचलः ॥ १७ ॥ एवंद्वादशवर्षाणित्यक्ताहारस्यभूभुजः ॥ वाग्भवंजपतोनित्यंमतिरासीच्छुभान्विता ॥ १८ ॥
तथाचदेव्याःपरमंमंत्रंसंजपतोरहः ॥ प्रादुरासीज्जगन्मातासाक्षाच्छ्रीपरमेश्वरी ॥ १९ ॥ तेजोमयीदुराधर्षासर्वदेवमयीश्वरी ॥ उवाचांगतनूजंतंप्रसन्नल
लिताक्षरम् ॥ २० ॥ देव्युवाच ॥ पृथिवीपालतेयत्स्याच्चिंतितंपरमंवरम् ॥ तद्बूहिसंप्रदास्यामितपसातेसुतोषिता ॥ २१ ॥ चाक्षुषउवाच ॥ जानासिदे
वदेवेशियत्प्रार्थ्यमनसेप्सितम् ॥ अंतर्यामिस्वरूपेणतत्सर्वंदेवपूजिते ॥ २२ ॥ तथाऽपिममभाग्येनजातंयत्तवदर्शनम् ॥ ब्रवीमिदेविमेदेहिराज्यंमन्वंत
राश्रितम् ॥ २३ ॥ श्रीदेव्युवाच ॥ दत्तंमन्वंतरस्याऽस्यराज्यंराजन्यसत्तम ॥ पुत्रामहाबलास्तेचभविष्यंतिगुणाधिकाः ॥ २४ ॥ राज्यंनिष्कंटकंभावि
मोक्षोंऽतेचापिनिश्चितः ॥ एवंदत्त्वापरंदेवीमनवेवरमुत्तमम् ॥ २५ ॥ जगामाऽदर्शनंसद्यस्तेनभक्त्याचसंस्तुता ॥ सोऽपिराजामनुःषष्ठःप्रसादाच्चुतदा
श्रयात् ॥ २६ ॥ बभूवमनुमान्योऽसौसार्वभौमसुखैर्वृतः॥ पुत्रास्तस्यबलोद्युक्ताःकार्यभारसहादृताः ॥ २७ ॥ देवीभक्ताश्चशूराश्चमहाबलपराक्रमाः ॥
अन्यत्रमाननीयाश्चमहाराज्यसुखास्पदाः ॥ २८ ॥ एवंचचाक्षुषमनुर्देव्याराधनतःप्रभुः ॥ बभूवमनुवर्योऽसौजगामांतेशिवापदम् ॥ २९ ॥ इतिश्रीदेवी
भागवतेमहापुराणेदशमस्कंधेदेवीचरित्रेनवमोऽध्यायः ॥ ९ ॥ ॥ श्रीनारायणउवाच ॥ सप्तमोमनुराख्यातोमनुर्वैवस्वतःप्रभुः ॥ श्राद्धदेवःपरानंदभोक्ता
मान्यस्तुभूभुजाम् ॥ १ ॥ सचवैवस्वतमनुःपरदेव्याःप्रसादतः ॥ तथातत्तपसाचैवजातोमन्वंतराधिपः ॥ २ ॥ अष्टमोमनुराख्यातःसावर्णिःप्रथितःक्षितौ ॥
सजन्मांतरआराध्यदेवींतद्वरलाभतः ॥ ३ ॥ जातोमन्वंतरपतिःसर्वराजन्यपूजितः ॥ महापराक्रमीधीरोदेवीभक्तिपरायणः ॥ ४ ॥ नारदउवाच ॥ कथंज
न्मांतरेतेनमनुनाऽऽराधनंकृतम् ॥ देव्याःपृथिव्युद्भवायास्तन्ममाख्यातुमर्हसि ॥ ५ ॥ श्रीनारायणउवाच ॥ चैत्रवंशसमुद्भूतोराजास्वारोचिषेऽंतरे ॥ सुर
थोनामविख्यातोमहाबलपराक्रमः ॥ ६ ॥ गुणग्राहीधनुर्धारीमान्यःश्रेष्ठःकविःकृती ॥ धनसंग्रहकर्ताचदाताचाचकमंडले ॥ ७ ॥

॥ ६ ॥

॥ ३ ॥ ४ ॥ पृथिव्युद्भवायामहीमयमूर्तेर्देव्याःकथमाराधनंकृतमित्यन्वयः ॥ ५ ॥ सुरथोनामेति ॥ ब्रह्मणःपुत्रोऽत्रिस्तस्यपुत्रोनिशाकरः सएवराजसूयंकृत्वाद्विजराजोऽभवत् तस्यपुत्रोबुधस्तस्य
पुत्रश्चैत्रस्तस्यपुत्रोविरथःतस्यपुत्रःसुरथः ॥ तदुक्तंब्रह्मवैवर्तेप्रकृतिखंडेदुर्गोपाख्याने ॥ तस्यचैत्रस्यपुत्रश्चराजाविरथएवहि ॥ तस्यपुत्रश्चसुरथश्चक्रवर्तीबृहच्छ्रवाइति ॥ ६ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोलाविध्वंसिनः ॥ कोलानाम्नीराज्ञोनगरीतस्याविध्वंसिनइत्यर्थः ॥ तदप्युक्तंप्रकृतिखंडेदुर्गामाहात्म्ये ॥ ध्रुवस्यपौत्रोबलवान्नंदिरुत्कुलनंदनः ॥ स्वायंभुवमनोर्वंशःसत्यवादीजितेंद्रियः ॥ अक्षौहिणीनांशतकंगृहीत्वासैन्यमेवच ॥ कोलांचवेष्टसामाससुरथस्यमहीपतेः ॥ युद्धंबभूवनियतंपूर्णमब्दंचनारद ॥ जिगायसुरथंराजाधुववंशोद्भवस्तदेति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

अरीणांमर्दनोमानीसर्वास्त्रकुशलोबली ॥ तस्यैकदाबभूवुस्तेकोलाविध्वंसिनोनृपाः ॥ ८ ॥ शत्रवःसैन्यसहिताःपरिवार्यैनमूर्जिताः ॥ रुरुधुर्नगरींतस्य राज्ञोमानधनस्यहि ॥ ९ ॥ तदाससुरथोनामराजासैन्यसमावृतः ॥ निर्ययौनगरात्स्वीयात्सर्वशत्रुनिबर्हणः ॥ १० ॥ तदाससमरेराजासुरथःशत्रुभिर्जितः ॥ आमात्यैर्मंत्रिभिश्चैवतस्यकोशगतंधनम् ॥ ११ ॥ त्दृतंसर्वमशेषेणतदाऽतप्यतभूमिपः ॥ निष्काशितश्चनगरात्सराजापरमद्युतिः ॥ १२ ॥ जगामाऽश्वमथाऽऽरुह्यमृगयामिषतोवनम् ॥ एकाकीविजनेऽरण्येबभ्रामोद्भ्रांतमानसः ॥ १३ ॥ मुनेःकस्यचिदागत्यस्वाश्रमंशांतमानसः ॥ प्रशांतजंतुसंयुक्तंमुनिशिष्यगणैर्युतम् ॥ १४ ॥ उवासकंचित्कालंसराजापरमशोभने ॥ आश्रमेमुनिवर्यस्यदीर्घदृष्टेःसुमेधसः ॥ १५ ॥ एकदासमहीपालोमुनिंपूजावसानके ॥ कालेगत्वाप्रणम्याऽऽशुपप्रच्छविनयान्वितः ॥ १६ ॥ मुनेममममनोदुःखंबाधतेचाधिसंभवम् ॥ ज्ञाततत्त्वस्यभूदेवनिष्प्रज्ञस्यचसंततम् ॥ १७ ॥ शत्रुभिर्निर्जितस्यापित्दृतराज्यस्यसर्वतः ॥ तथापितेषुमनसिममत्वंजायतेस्फुटम् ॥ १८ ॥ किंकरोमिक्वगच्छामिकथंशर्मलभेमुने ॥ त्वदनुग्रहमाशासेवदवेदविदांवर ॥ १९ ॥ मुनिरुवाच ॥ आकर्णयमहीपालमहाश्चर्यकरंपरम् ॥ देवीमाहात्म्यमतुलंसर्वकामप्रदंपरम् ॥ २० ॥ जगन्मयीमहामायाविष्णुब्रह्महरोद्भवा ॥ साबलादपत्दृत्यैवजंतूनांमानसानिहि ॥ २१ ॥ मोहायप्रतिसंयच्छेदितिजानीहिभूमिप ॥ सासृजत्यखिलंविश्वंसापालयतिसर्वदा ॥ ॥ २२ ॥ संहारेहररूपेणसंहरत्येवभूमिप ॥ कामदात्रीमहामायाकालरात्रिर्दुरत्यया ॥ २३ ॥ विश्वसंहारिणीकालीकमलाकमलालया ॥ तस्यांसर्वं जगज्जातंतस्यांविश्वंप्रतिष्ठितम् ॥ २४ ॥ लयमेष्यतितस्यांचतस्मात्सैवपरात्परा ॥ तस्यादेव्याःप्रसादश्चयस्योपरिभवेन्नृप ॥ २५ ॥ सएवमोहमत्येतिनान्यथाधरणीपते ॥ ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेदशमोऽध्यायः ॥ १० ॥ ॥ राजोवाच ॥ कासादेवीत्वयाप्रोक्ताब्रूहिकालविदांवर ॥ कामोहयतिसत्त्वानिकारणंकिंभवेद्विज ॥ १ ॥ कस्मादुत्पद्यतेदेवीकिंरूपासाकिमात्मका ॥ सर्वमाख्याहिभूदेवकृपयाममसर्वतः ॥ २ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ ब्रह्मविष्णुहराणामुद्भवोजन्मयस्याःसकाशादित्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ ॥ इतिश्रीदेवीभागवततिलकेदशमस्कंधेदशमोऽध्यायः ॥ १० ॥ ॥ ७ ॥ ॥ चतुर्विंशन्महापद्यैस्त्रैलोक्यक्षेमकारकम् ॥ महाकालीचरित्रंचसंक्षेपेणाऽत्रकथ्यते ॥ १ ॥ मुनिवाक्यंश्रुत्वाराजापृच्छति कासादेवीति ॥ सत्त्वानिजीवान् ॥ कारणंकिंमोहनेइत्यर्थः ॥ १ ॥ २ ॥ ॥७॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥४॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ निद्रांलक्षणयानिद्राधिष्ठात्रींमहाकालींभगवतींप्रथमचरित्रदेवताम् ॥ अतएवसर्वप्रसूतिकामितिविशेषणंसंगच्छते ॥ १० ॥ समुद्रशयने ॥ समुद्रवंत्यस्माद्भूतजा तानीतिसमुद्रःपरमात्मा सशयनंवासस्थानंयस्याः ॥ ब्रह्मरूपिणीत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ एकाअद्वितीया ॥ एकस्वरूपाएकसंख्यारूपा ॥ सद्वितीयाद्वितीयमायावस्तुसहिता ॥ द्वया त्मिकाद्वित्वसंख्याविशिष्टपदार्थात्मिका ॥१५॥ त्रयीवेदत्रयीतद्रूपागुणत्रयरूपावा ॥ त्रिवर्गोधर्मार्थकामाः ॥ तुर्यातुर्यावस्थारूपा ॥ तुर्यपदब्रह्मतदात्मिका ॥ यद्वा तुर्यातुरीयसंख्यारूपा ॥ एवमेकादिपदैरपिएकत्वादिसंख्याएवलक्षणयाग्राह्याः॥यद्वा प्रतिपदादितिथयोग्राह्याः ॥ पंचमीपंचत्वसंख्यारूपाषष्ठीषट्संख्यारूपाएवमेवषष्ठेश्वरीषष्ठःषण्णांपूरकःपदार्थस्तस्येश्वरी ॥ एवंसर्वत्रव्याख्येयम् ॥१६॥१७॥१८॥१९॥ त्रयोदशात्मिकेति॥मलमासेनसहत्रयोदशमासात्मिकेत्यर्थः ॥२०॥२१॥ पंचाधिकदशीपंचदशीकामराजविद्यारूपात्रिपुरसुंदरीविद्यातयावेत्यर्थः ॥ पंचाधिकदशीतिथिः पंचदशीतिथिरूपेत्यर्थः ॥२२॥ २३ ॥ २४ ॥ २५ ॥

॥ ७ ॥

मुनिरुवाच ॥ राजन्देव्याःस्वरूपंतेवर्णयामिनिशामय ॥ यथाचोत्पतितादेवीयेनवासाजगन्मयी ॥३॥ यदानारायणोदेवोविश्वंसंहृत्ययोगराट् ॥ आस्तीर्य शेषंभगवान्समुद्रेनिद्रितोऽभवत् ॥ ४ ॥ तदाप्रस्वापवशगोदेवदेवोजनार्दनः ॥ तत्कर्णमलसंजातौदानवौमधुकैटभौ ॥ ५ ॥ ब्रह्माणंहंतुमुद्युक्तौदानवौ घोररूपिणौ ॥ तदाकमलजोदेवोदृष्ट्वातौमधुकैटभौ ॥ ६ ॥ निद्रितंदेवदेवेशंचिंतामापदुरत्ययाम् ॥ निद्रितोभगवानीशोदानवौचदुरासदौ ॥ ७ ॥ किंकरो मिक्कगच्छामिकथंशर्मलभेह्यहम् ॥ एवंचिंतयतस्तस्यपद्मयोनेर्महात्मनः ॥ ८ ॥ बुद्धिःप्रादुरभूत्तातततदाकार्यप्रसाधिनी ॥ यस्यावशंगतोदेवोनिद्रितोभ गवान्हरिः ॥ ९ ॥ तांदेवींशरणंयामिनिद्रांसर्वप्रसूतिकाम् ॥ ब्रह्मोवाच ॥ देवदेविजगद्धात्रिभक्ताभीष्टफलप्रदे ॥ १० ॥ जगन्मायेमहामायेसमुद्रशयने शिवे ॥ त्वदाज्ञावशगाःसर्वेस्वस्वकार्यविधायिनः ॥ ११ ॥ कालरात्रिर्महारात्रिर्मोहरात्रिर्मदोत्कटा ॥ व्यापिनीवशगामान्यामहानंदैकशेवधिः॥ १२ ॥ महनीयामहाराध्यामायामधुमतीमही ॥ परापराणांसर्वेषांपरमात्वंप्रकीर्तिता ॥१३॥ लज्जापुष्टिःक्षमाकीर्तिःकांतिःकारुण्यविग्रहा ॥ कमनीयाजगद्वंद्या जाग्रदादिस्वरूपिणी ॥ १४ ॥ परमापरमेशानीपरनंदापरायणा ॥ एकाऽप्येकस्वरूपाचसद्वितीयादयात्मिका ॥ १५ ॥ त्रयीत्रिवर्गनिलयातुर्यातुर्यपदा त्मिका ॥ पंचमीपंचभूतेशीषष्ठीषष्ठेश्वरीतिच ॥ १६ ॥ सप्तमीसप्तवारेशीमप्तसप्तवरप्रदा ॥ अष्टमीवसुनाथाचनवग्रहमयीश्वरी ॥ १७ ॥ नवरागकलार म्यानवसंख्यानवेश्वरी ॥ दशमीदशदिक्पूज्यादशाशाव्यापिनीरमा ॥ १८ ॥ एकादशात्मिकाचैकादशरुद्रनिषेविता ॥ एकादशीतिथिप्रीताएकादश गणाधिपा ॥ १९ ॥ द्वादशीद्वादशभुजाद्वादशादित्यजन्मभूः ॥ त्रयोदशात्मिकादेवीत्रयोदशगणप्रिया ॥ २० ॥ त्रयोदशाभिधाभिन्नाविश्वेदेवाधिदेवता॥ चतुर्दशेंद्रवरदाचतुर्दशमनुप्रसूः ॥ २१ ॥ पंचाधिकदशीवेद्यापंचाधिकदशीतिथिः ॥ षोडशीषोडशभुजाषोडशेंदुकलामयी ॥ २२ ॥ षोडशात्मकचंद्रांशुव्याप्तदिव्यकलेवरा ॥ एवंरूपाऽसिदेवेशिनिर्गुणेतामसोदये ॥ २३ ॥ त्वयागृहीतोभगवान्देवदेवोरमापतिः ॥ एतौदुरासदौदैत्यौविक्रांतौमधुकैटभौ ॥ ॥ २४ ॥ एतयोश्चवधार्थायदेवेशंप्रतिबोधय ॥ मुनिरुवाच ॥ एवंस्तुताभगवतीतामसीभगवत्प्रिया ॥ २५ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ इतिश्रीदेवीभागवततिलकेदशमस्कंधेएकादशोध्यायः ॥ ११ ॥ ॥ त्र्यधिकेनैवतिश्लोकैर्महालक्ष्म्याःकथानकम् ॥ तथाम
हासरस्वत्याःसंक्षेपेणात्रवर्ण्यते ॥१ ॥ प्रतिज्ञातांमहालक्ष्म्याउत्पत्तिंवर्णयति ॥ महिषीगर्भेति ॥ इयंकथापंचमस्कंधेविस्तरेणोक्ता ॥ १ ॥ २ ॥ लोकमुत्तममिति ॥ लोकस्तुभुवनेजनेइतिकोशात्

देवदेवंतदात्यक्तामोहयामासदानवौ ॥ तदैवभगवान्विष्णुःपरमात्माजगत्पतिः ॥२६॥ प्रबोधमापदेवेशोदृदृशेदानवोत्तमौ ॥ तदातौदानवौघोरौदृष्ट्वातंम
धुसूदनम् ॥ २७ ॥ युद्धायकृतसंकल्पौजग्मतुःसन्निधिंहरेः ॥ युयुधेचततस्ताभ्यांभगवान्मधुसूदनः ॥ २८ ॥ पंचवर्षसहस्राणिबाहुप्रहरणोविभुः
॥ तौतदाऽतिबलोन्मत्तौजगन्मायाविमोहितौ ॥ २९ ॥ व्रियतांवरइत्येवमूचतुःपरमेश्वरम् ॥ एवंतयोर्वचःश्रुत्वाभगवानादिपूरुषः ॥ ३० ॥ वव्रे
वध्यावुभौमेऽद्यभवेतामितिनिश्चितम् ॥ तौतदाऽतिबलौदेवंपुनरेवोचतुर्हरिम् ॥ ३१ ॥ आवांजहिनयत्रोर्वीपयसाचपरिप्लुता ॥ तथेत्युक्त्वाभगवतागदा
शंखभृतानृप ॥ ३२ ॥ कृत्वाचक्रेणवैछिन्नजघनेशिरसीतयोः ॥ एवंदेवीसमुत्पन्नाब्रह्मणासंस्तुतानृप ॥ ३३ ॥ महाकालीमहाराजसर्वयोगेश्वरेश्वरी ॥
महालक्ष्म्यास्तथोत्पत्तिंनिशामयमहीपते ॥ ३४ ॥ इतिश्रीदेवीभागवतेम० दशमस्कंधेदेवीमाहात्म्येएकादशोऽध्यायः ॥ ११ ॥ ॥ मुनिरुवाच ॥ म
हिषीगर्भसंभूतोमहाबलपराक्रमः ॥ देवान्सर्वान्पराजित्यमहिषोऽभूज्जगत्प्रभुः ॥१॥सर्वेषांलोकपालानामधिकारान्महासुरः ॥ बलान्निर्जित्यबुभुजेत्रैलो
क्यैश्वर्यमद्भुतम् ॥ २ ॥ ततःपराजिताःसर्वेदेवाःस्वर्गपरिच्युताः ॥ ब्रह्माणंचपुरस्कृत्यतेजग्मुर्लोकमुत्तमम् ॥ ३ ॥ यत्रोत्तमौदेवदेवौसंस्थितौशंकराच्यु
तौ ॥ वृत्तांतंकथयामासुर्महिषस्यदुरात्मनः ॥ ४ ॥ देवानांचैवसर्वेषांस्थानानितरसाऽसुरः ॥ विनिर्जित्यस्वयंभुंक्तेबलवीर्यमदोद्धतः ॥ ५ ॥ महि
षासुरनामाऽसौदुष्टदैत्योऽमरेश्वरौ ॥ वधोपायश्चतस्याऽशुचिंत्यतामसुरार्दनौ ॥ ६ ॥ एवंश्रुत्वासभगवान्देवानामार्तियुग्वचः ॥ चकारकोपंसुबहुंत
थाशंकरपद्मजौ ॥ ७ ॥ एवंकोपयुतस्यास्यहरेरास्यान्महीपते ॥ तेजःप्रादुरभूद्दिव्यंसहस्रार्कसमद्युति ॥८॥ अथानुक्रमतस्तेजःसर्वेषांत्रिदिवौकसाम्
॥ शरीरादुद्भवंप्रापहर्षयद्विबुधाधिपान् ॥ ९ ॥ यदभूच्छंभुजंतेजोमुखमस्योदपद्यत ॥ केशाबभूवुर्याम्येनवैष्णवेनचबाहवः ॥१०॥ सौम्येनचस्तनौजातौ
माहेंद्रेणचमध्यमः ॥ वारुणेनततोभूपजंघोरूसंबभूवतुः ॥११॥ नितंबौतेजसाभूमेःपादौब्राह्मेणतेजसा ॥ पादांगुल्योभानवेनवासवेनकरांगुलीः ॥ १२ ॥

भुवनंकात्यायनाश्रमरूपमित्यर्थः ॥ ३ ॥ यत्रोत्तमौदेवदेवाविति ॥ यत्रकात्यायनाश्रमेइत्यर्थः ॥ अतएवकालिकापुराणेकात्यायनशिष्यंस्त्रीरूपेणमोहयंतंमहिषासुरंप्रतिकात्यायनःशशापस्त्रीत्वां
निहनिष्यतीति॥तद्वचनसार्थक्यायदेव्यातदाश्रमएवावतारोगृहीतोऽतएवदेव्याःकात्यायनीतिनामेत्युक्तम् ॥ इत्थंवृत्तांतमवतारस्यहरिहरौज्ञात्वाप्रथमतएवक.त्यायनाश्रमेगत्वास्थितवंताविति
गम्यते ॥ ४ ॥५ ॥ ६ ॥ ७ ॥ ८ ॥९ ॥ १० ॥ ११ ॥ करांगुलीःकरांगुल्यः ॥ आर्षप्रयोगः ॥ १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ रूपांतराणि गजादीनाम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

कौबेरेणतथानासादंताःसंजज्ञिरेतदा ॥ प्राजापत्येनोत्तमेनतेजसावसुधाधिप ॥१३॥ पावकेनचसंजातंलोचनत्रितयंशुभम् ॥ सांध्येनतेजसाजातेभ्रुकुट्यौ तेजसोनिधी ॥१४॥ कर्णौवायव्यतोजातौतेजसोमनुजाधिप ॥ सर्वेषांतेजसादेवीजातामहिषमर्दिनी ॥१५॥ शूलंददौशिवोविष्णुश्चक्रंशंखंचपाशभृत् ॥ हुताशनोददौशक्तिंमारुतश्चापसायकौ ॥ १६ ॥ वज्रमहेंद्रःप्रददौघंटांचैरावताद्गजात् ॥ कालदंडंयमोब्रह्माचाक्षमालाकमंडलू ॥१७॥ दिवाकरोरश्मिमालांरोमकूपेषुसंददौ ॥कालःखड्गंतथाचर्मनिर्मलंचसुधाधिप ॥१८॥ समुद्रोनिर्मलंहारमजरेचांबरेनृप ॥ चूडामणिंकुंडलेचकटकानितथांगदे ॥ १९ ॥ अर्धचंद्रंनिर्मलंचनूपुराणितथाददौ ॥ग्रैवेयकंभूषणंचतस्यैदेव्यैमुदान्वितः॥२०॥विश्वकर्माचोर्मिकास्यददौतस्यैधरापते॥हिमवान्वाहनंसिंहंरत्नानिविविधानि च ॥२१॥ पानपात्रंसुरापूर्णंददौतस्यैधनाधिपः ॥ शेषश्चभगवान्देवोनागहारंददौविभुः ॥२२ ॥ अन्यैरशेषविबुधैर्मानितासाजगन्मयी॥ तांतुष्टुवुर्महादेवीं देवामहिषपीडिताः ॥२३॥ नानास्तोत्रैर्महेशानींजगदुद्भवकारिणीम् ॥ तेषांनिशम्यदेवेशीस्तोत्रंविबुधपूजिता ॥ २४ ॥ महिषस्यवधार्थायमहानादंचकारह ॥ तेननादेनमहिषश्चकितोभूद्भरापते ॥ २५ ॥आससादजगद्धात्रींसर्वसैन्यसमावृतः ॥ ततःसयुयुधेदेव्यामहिषाख्योमहासुरः॥२६ ॥ शस्त्रास्त्रैर्बहुधाक्षिप्तैःपूरयन्नंबरांतरम्॥चिक्षुरोग्रामणीःसेनापतिर्दुर्धरदुर्मुखौ॥२७॥वाष्कलस्ताम्रकश्चैवबिडालवदनोपरः॥एतैश्चान्यैरसंख्यातैःसंग्रामांतकसन्निभैः ॥२८॥ योधैःपरिवृतोवीरोमहिषोदानवोत्तमः ॥ ततःसाकोपताम्राक्षीदेवीलोकविमोहिनी ॥२९॥ जघानयोधान्समरेदेवीमहिषमाश्रितान् ॥ ततस्तेषुहतेष्वेवस दैत्योरोषमूर्छितः ॥ ३० ॥ आससादतदादेवींतूर्णमायाविशारदः ॥ रूपांतराणिसंभेजेमायायादानवेश्वरः ॥३१ ॥ तानितान्यस्यरूपाणिनाशयामाससातदा ॥ ततोऽतेमाहिषंरूपंबिभ्राणममरार्दनम् ॥३२ ॥ पाशेनबद्ध्वासुदृढंछित्त्वाखड्गेनतच्छिरः ॥पातयामासमहिषंदेवीदेवगणांतकम्॥३३॥हाहाकृतंततःशेषसैन्यंभग्नंदिशोदश ॥ तुष्टुवुर्देवदेवेशींसर्वेदेवाःप्रमोदिताः॥३४॥ एवंलक्ष्मीःसमुत्पन्नामहिषासुरमर्दिनी ॥ राजञ्छृणुसरस्वत्याःप्रादुर्भावोयथाऽभवत् ॥ ३५ ॥ एकदाशुंभनामाऽऽसीद्दैत्योमदबलोत्कटः ॥ निशुंभश्चापितद्भ्रातामहाबलपराक्रमः ॥ ३६ ॥ तेनसंपीडितादेवाःसर्वेभ्रष्टश्रियोनृप ॥ हिमवंतमथासाद्यदेवींतुष्टुवुरादरात् ॥ ३७ ॥ देवाऊचुः ॥ जयदेवेशिभक्तानामार्तिनाशनकोविदे ॥ दानवांतकरूपेत्वमजरामरणेऽनघे ॥ ३८ ॥ देवेशिभक्तिसुलभेमहाबलपराक्रमे ॥ विष्णुशंकरब्रह्मादिस्वरूपेऽनंतविक्रमे ॥ ३९ ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ प्रथममदर्शनंगतांपुनर्हेमालयेसुंदररूपंधृत्वास्थितांचंडमुंडौदृष्टवंतावित्याह चंडमुंडाविति॥ अत्रपंचमस्कंधोक्तकथ

सृष्टिस्थितिकरेनाशकारिकेकांतिदायिनि ॥ महातांडवसुप्रीतेमोददायिनिमाधवि ॥ ४० ॥ प्रसीददेवदेवेशिप्रसीदकरुणानिधे ॥ निशुंभशुंभसंभूतभया
पारांबुवारिधेः ॥ ४१ ॥ उद्धराऽस्मान्प्रपन्नार्तिनाशिकेशरणागतान् ॥ एवंसंस्तुवतांतेषांत्रिदशानांधरापते ॥ ४२ ॥ प्रसन्नागिरिजाप्राहभूतस्तवनका
रणम् ॥ एतस्मिन्नंतरेतस्याःकोशरूपात्समुत्थिता ॥ ४३ ॥ कौशिकीसाजगत्पूज्यादेवान्प्रीत्येदमब्रवीत् ॥ प्रसन्नाऽहंसुरश्रेष्ठास्तवेनोत्तमरूपिणी ॥
॥ ४४ ॥ ब्रियतांवरइत्युक्तेदेवाःसंवव्रिरेवरम् ॥ शुंभनामावरोभ्रातानिशुंभस्तस्यविश्रुतः ॥४५॥ त्रैलोक्यमोजसाक्रांतंदैत्येनबलशालिना ॥ तद्वधश्चि
त्यतांदेविदुरात्मादानवेश्वरः ॥ ४६ ॥ बाधतेसततंदेवितिरस्कृत्यनिजौजसा ॥ श्रदिव्युवाच ॥ देवशत्रुंपातयिष्येनिशुंभंशुंभमेवच ॥४७॥ स्वस्थास्ति
ष्ठतभद्रंवःकंटकंनाशयामिवः ॥ इत्युक्त्वादेवदेवेशीदेवान्सेंद्रान्दयामयी ॥ ४८ ॥ जगामाऽदर्शनंसद्योमिषतांत्रिदिवौकसाम् ॥ देवाःसमागतात्दृष्टाःसु
वर्णाद्रिगुहांशुभाम् ॥ ४९ ॥ चंडमुंडौपश्यतःस्मभृत्यौशुंभनिशुंभयोः ॥ दृष्ट्वातांचारुसर्वांगींदेवींलोकविमोहिनीम् ॥ ५० ॥ कथयामासतूराज्ञेभृत्यौ
तौचंडमुंडकौ ॥ देवसर्वासुरश्रेष्ठरत्नभोगार्हमानद ॥ ५१ ॥ अपूर्वाकामिनीदृष्टाचावाभ्यांरिपुमर्दन ॥ तस्याःसंभोगयोग्यत्वमस्त्येवतवसांप्रतम् ॥
॥ ५२ ॥ तांसमानयचार्वंगींभुंक्ष्वसौख्यसमन्वितः ॥ तादृशीनासुरीनारीनगंधर्वीनदानवी ॥ ५३ ॥ नमानवीनापिदेवीयादृशीसामनोहरा ॥ एवंभृ
त्यवचःश्रुत्वाशुंभःपरबलार्दनः ॥ ५४ ॥ दूतंसंप्रेषयामाससुग्रीवंनामदानवम् ॥ सदूतस्त्वरितंगत्वादेव्याःसविधमादरात् ॥ ५५ ॥ वृत्तांतंकथयामास
देव्यैशुंभस्ययद्वचः ॥ देविशुंभासुरोनामत्रैलोक्यविजयीप्रभुः ॥ ५६ ॥ सर्वेषांरत्नवस्तूनांभोक्तामान्योदिवौकसाम् ॥ तदुक्तंशृणुमेदेविरत्नभोक्ताऽहम
व्ययः ॥ ५७ ॥ त्वंचापिरत्नभूताऽसिभजमांचारुलोचने ॥ सर्वेषुयानिरत्नानिदेवासुरनरेषुच ॥ ५८ ॥ तानिमय्येवसुभगेभजमांकामजैरसैः ॥ देव्यु
वाच ॥ सत्यंवदसिहेदूतदैत्यराजप्रियंकरम् ॥ ५९ ॥ प्रतिज्ञायामयापूर्वंकृतासाप्यनृताकथम् ॥ भवेत्तांशृणुमेदूतयाप्रतिज्ञामयाकृता ॥ ६० ॥ यो
मेदर्पंविधुनुतेयोमेबलमपोहति ॥ योमेप्रतिबलोभूयात्सएवममभोगभाक् ॥ ६१ ॥ ततएनांप्रतिज्ञांमेसत्यांकृत्वासुरेश्वरः ॥ गृह्णातुपाणिंतरसातस्या
ऽशक्यंकिमत्रहि ॥६२॥ तस्माद्गच्छमहादूतस्वामिनंब्रूहिचादृतः ॥ प्रतिज्ञांचापिमेसत्यांविधास्यतिबलाधिकः ॥६३॥ एवंवाक्यंमहादेव्याःसमाकर्ण्यस
दानवः ॥ कथयामासशुंभायदेव्यावृत्तांतमादितः ॥ ६४ ॥ तदप्रियंदूतवाक्यंशुंभःश्रुत्वामहाबलः ॥ कोपमाहारयामासमहांतंदनुजाधिपः ॥ ६५ ॥

याऽत्रत्योक्तकथयाचक्रचित्कचिद्विरोधोदृश्यतेसवक्तृभेदात्कल्पभेदाच्चपरिहार्यः॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोधूम्राक्षनामानंदैत्यंदैत्यपतिःप्रभुः ॥ आदिदेशशृणुवचोधूम्राक्षममचाहृतः ॥ ६६ ॥ तांदुष्टांकेशपाशेषुधृत्वाप्यानीयतांमम ॥ समीपमविलंबेन शीघ्रंगच्छस्वमेपुरः ॥ ६७ ॥ इत्यादेशंसमासाद्यदैत्येशोधूम्रलोचनः ॥ षष्ट्यासुराणांसहितःसहस्राणांमहाबलः ॥ ६८ ॥ तुहिनाचलमासाद्यदेव्याः सविधमेवसः ॥ उच्चैर्देवींजगादाशुभजदैत्यपतिंशुभे ॥ ६९ ॥ शुंभंनाममहावीर्यंसर्वभोगानवाप्नुहि ॥ नोचेत्केशान्गृहीत्वात्वांनेष्यैदैत्यपतिंप्रति॥७०॥ इत्युक्तासाततोदेवीदैत्येनत्रिदशारिणा ॥ उवाचदैत्ययद्भूषेतत्सत्यंतेमहाबल ॥ ७१ ॥ राजाशुंभासुरस्त्वंचकिंकरिष्यसितद्वद ॥ इत्युक्तोदैत्यपोऽधावत्तूर्णंशस्त्रसमन्वितः ॥ ७२ ॥ भस्मसात्तंचकाराशुहुंकारेणमहेश्वरी ॥ ततःसैन्यंवाहनेनदेव्याभग्नंमहीपते ॥ ७३ ॥ दिशोदशाभजच्छीघ्रंहाहाभूतमचेतनम् ॥ तद्वृत्तांतंसमाश्रुत्यसशुंभोदैत्यराड्विभुः ॥ ७४ ॥ चुकोपचमहाकोपाद्भ्रुकुटीकुटिलाननः ॥ ततःकोपपरीतात्मादैत्यराजःप्रतापवान् ॥७५॥ चंडंमुंडंरक्तबीजंक्रमतःप्रैषयद्विभुः ॥ तेचगत्वात्रयोदैत्याविक्रांताबहुविक्रमाः ॥ ७६ ॥ देवींग्रहीतुमारब्धयत्नास्तेह्यभवन्बलात् ॥ तानापततएवासौजगद्धात्रीमदोत्कटा ॥ ७७ ॥ शूलंगृहीत्वावेगेनपातयामासभूतले ॥ ससैन्यान्निहताञ्छ्रुत्वादैत्यांस्त्रीन्दानवेश्वरौ ॥ ७८ ॥ शुंभश्चैवनिशुंभश्चसमाजग्मतुरोजसा ॥ निशुंभश्चैवशुंभश्चकृत्वायुद्धंमहोत्कटम् ॥ ७९ ॥ देव्याश्चवशगौजातौनिहतौचतयासुरौ ॥ इतिदैत्यवरंशुंभंघातयित्वाजगन्मयी ॥ ८० ॥ विबुधैःसंस्तुतातद्वत्साक्षाद्वागीश्वरीपरा ॥ एवंतेवर्णितोराजन्प्रादुर्भावोऽतिरम्यकः ॥ ८१ ॥ काल्याश्चैवमहालक्ष्म्याःसरस्वत्याःक्रमेणच ॥ परापरेश्वरी देवीजगत्सर्गंकरोतिच ॥ ८२ ॥ पालनंचैवसंहारंसैवदेवीदधातिहि ॥ तांसमाश्रयदेवेशींजगन्मोहनिवारिणीम् ॥ ८३ ॥ महामायांपूज्यतमांसाकार्यंतेविधास्यति ॥ श्रीनारायणउवाच ॥ इतिराजावचःश्रुत्वामुनेःपरमशोभनम् ॥ ८४॥ देवींजगामशरणंसर्वकामफलप्रदाम् ॥ निराहारोयतात्माचतन्मनाश्चसमाहितः ॥ ८५ ॥ देवीमूर्तिंमृन्मयींचपूजयामासभक्तितः ॥ पूजनांतेबलिंतस्यैनिजगात्रासृजंददत् ॥८६॥ तदाप्रसन्नादेवेशीजगद्योनिःकृपावती ॥ प्रादुर्बभूवपुरतोवरंब्रूहीतिभाषिणी ॥ ८७ ॥ सराजानिजमोहस्यनाशनंज्ञानमुत्तमम् ॥ राज्यंनिष्कंटकंचैवयाचतिस्ममहेश्वरीम् ॥ ८८ ॥ श्रीदेव्युवाच ॥ राजन्निष्कंटकंराज्यंज्ञानंवैमोहनाशनम् ॥ भविष्यतिमयादत्तमस्मिन्नेवभवेतव ॥ ८९ ॥ अन्यच्चशृणुभूपालजन्मांतरविचेष्टितम् ॥भानोर्जन्मसमासाद्यसावर्णिर्भवितासुतः ॥ ९० ॥ तत्रमन्वंतरस्यापिपतित्वंबहुविक्रमम् ॥ संततिंबहुलांचापिप्राप्स्यसेमद्वराद्भुवान् ॥ ९१ ॥ एवंदत्त्वा वरंदेवीजगामादर्शनंतदा ॥ सोपिदेव्याःप्रसादेनजातोमन्वंतराधिपः ॥ ९२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ९३ ॥ इतिश्रीदेवीभागवततिलकेदशमस्कंधेद्वादशोऽध्यायः ॥ १२ ॥ ॥ सप्तविंशतियुक्तैश्चशतश्लोकैरतःपरम् ॥ मनूनामवशिष्टानांषण्णांवृत्तमुदीर्यते ॥ १ ॥ अष्टममूनांवृत्तमभिधायावशिष्ट
षण्ममूनांवृत्तंकीर्तयति अथातइति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ आत्मन्येवस्वात्मन्येवसर्वंजगद्दर्शनंजगामसर्वाधिष्ठानब्रह्मरूपदेव्याःसाक्षात्कारस्तेषांजातइतिभावः

एवंतेवर्णितंसाधोसावर्णेर्जन्मकर्मच ॥ एतत्पठंस्तथाशृण्वन्देव्यनुग्रहमाप्नुयात् ॥ ९३ ॥ ॥ इतिश्रीदेवीभागवतेमहापुराणेदशमस्कंधेदेवीमाहात्म्येद्वाद
शोऽध्यायः ॥ १२ ॥ ॥ श्रीनारायणउवाच ॥ अथातःश्रूयतांशेषमनूनांचित्रमुद्भवम् ॥ यस्यस्मरणमात्रेणदेवीभक्तिःप्रजायते ॥१॥ आसन्वैवस्वतमनोः
पुत्राःषड्विमलोदयाः ॥ करूषश्चपृषध्रश्चनाभागोदिष्टएवच ॥ २ ॥ शर्यातिश्चत्रिशंकुश्चसर्वएवमहाबलाः ॥ ततःषडेवतेगत्वाकालिंद्यास्तीरमुत्तमम् ॥३॥
निराहाराजितश्वासाःपूजांचक्रुस्ततःस्थिताः ॥ देव्यामहीमयींमूर्तिंविनिर्मायपृथक्पृथक् ॥ ४ ॥ विविधैरुपचारैस्तांपूजयामासुरादृताः ॥ ततश्चसर्वएवैते
तपःसारामहाबलाः ॥ ५ ॥ जीर्णपर्णाशनावायुभक्षणास्तोयजीवनाः ॥ धूम्रपानारश्मिपानाःक्रमशश्चबहुश्रमाः ॥ ६ ॥ ततस्तेषामादरेणाऽऽराधनंकुर्व
तांसदा ॥ विमलामतिरुत्पन्नासर्वमोहविनाशिनी ॥ ७ ॥ बभूवुर्मनुपुत्रास्तेदेवीपादैकचिंतनाः ॥ मत्याविमलयातेषामात्मन्येवाखिलंजगत् ॥ ८ ॥ दर्श
नंसंजगामाशुतदद्भुतमिवाभवत् ॥ एवंद्वादशवर्षांतेतपसाजगदीश्वरी ॥ ९ ॥ प्रादुर्बभूवदेवेशीसहस्रार्कसमद्युतिः॥ तांदृष्ट्वाविमलात्मानोराजपुत्राःषडेवते
॥ १० ॥ तुष्टुवुर्भक्तिनम्रांतःकरणाभावसंयुताः ॥ राजपुत्रऊचुः ॥ महेश्वरिजयेशानिपरमेकरुणालये ॥ ११ ॥ वाग्भवाराधनप्रीतेवाग्भवप्रतिपादिते ॥
ह्रींकारविग्रहेदेविह्रींकारप्रीतिदायिनि ॥ १२ ॥ कामराजमनोमोददायिनीश्वरतोषिणि ॥ महामायेमोदपरेमहासाम्राज्यदायिनि ॥१३॥ विष्ण्वर्कहरश
क्रादिस्वरूपेभोगवर्धिनि ॥ एवंस्तुताभगवतीराजपुत्रैर्महात्मभिः ॥ १४ ॥ प्रसादसुमुखीदेवीप्रोवाचवचनंशुभम् ॥ श्रीदेव्युवाच ॥ राजपुत्रामहात्मानो
भवंतस्तपसायुताः ॥ १५ ॥ निष्कल्मषाःशुद्धधियोजातावैमदुपासनात् ॥ वरंमनोगतंसर्वयाचध्वमविलंबितम् ॥ १६ ॥ प्रसन्नाऽहंप्रदास्यामियुष्माकं
मनसिस्थितम् ॥ राजपुत्राऊचुः ॥ देविनिष्कंटकंराज्यंसंततिश्चिरजीविनी ॥ १७ ॥ भोगाअव्याहताःकामंयशस्तेजोमतिश्चह ॥अकुंठितत्वंसर्वेषामेषएव
वरोहितः ॥ १८ ॥ श्रीदेव्युवाच ॥ एवमस्तुचसर्वेषांभवतांयन्मनोगतम् ॥ अथान्यदपिमेवाक्यंश्रूयतामादरादिदम् ॥ १९ ॥ भवंतःसर्वएवैतेमन्वंतर
पतीश्वराः ॥ संतत्यादीर्घयाभोगैरनेकैरपिसंगमः ॥ २० ॥ अखंडितबलैश्वर्ययशस्तेजोविभूतयः ॥ भवितारोमत्प्रसादाद्राजपुत्राःक्रमेणतु ॥ २१ ॥

॥ तथाचमनुः सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि ॥ संपश्यन्नात्मनाजीवैःस्वाराज्यमधिगच्छतीति ॥ ८ ॥ तदद्भुतमिवेति ॥ यद्योगादिभिरपिवस्तुनप्राप्यतेतत्केवलंभगवत्याराधनेनाऽऽत्मस्व
रूपंलब्धमित्याश्चर्यंलोकानामभवदित्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ कामराजःकामेश्वरः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रामरीजगदंबिकेति ॥ अनेनचैतेषण्मनवोभ्रामर्यादेवतायाउपासकाइतिबोधितम् ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ भ्रामर्यास्तुप्रसा

श्रीनारायणउवाच ॥ एवंतेभ्योवरान्दत्त्वाभ्रामरीजगदंबिका ॥ अंतर्धानंजगामाऽऽशुभक्त्यातैःसंस्तुतासती ॥ २२ ॥ तेराजपुत्राःसर्वेऽपितस्मिञ्जन्म न्यनुत्तमम् ॥ राज्यंमहीगतान्भोगान्बुभुजुश्चमहौजसः ॥२३॥ संतातिंचाऽखंडितांतेसमुत्पाद्यमहीतले ॥ वंशंसंस्थाप्यसर्वेऽपिमनूनांपतयोऽभवन् ॥ ॥ २४ ॥ भवांतरेक्रमेणैवसावर्णिपदभागिनः ॥ प्रथमोदक्षसावर्णिर्नवमोमनुरीरितः ॥ २५ ॥ अव्याहतबलोदेव्याःप्रसादादभवद्विभुः ॥ द्वितीयोमेरुसाव र्णिर्दशमोमनुरेवच ॥ २६ ॥ बभूवमन्वंतरपोमहादेवीप्रसादतः ॥ तृतीयोमनुराख्यातःसूर्यसावर्णिनामकः ॥ २७ ॥ एकादशोमहोत्साहस्तपसास्वे नभावितः ॥ चतुर्थश्चंद्रसावर्णिर्द्वादशोमनुराड्विभुः ॥ २८ ॥ देवीसमाराधनेनजातोमन्वंतरेश्वरः ॥ पंचमोरुद्रसावर्णिस्त्रयोदशमनुःस्मृतः ॥ २९ ॥ म हाबलोमहासत्त्वोबभूवजगदीश्वरः ॥ षष्ठश्चविष्णुसावर्णिश्चतुर्दशमनुःकृती ॥ ३० ॥ बभूवदेवीवरतोजगतांप्रथितःप्रभुः ॥ चतुर्दशैतेमनवोमहातेजोब लैर्युताः ॥ ३१ ॥ देव्याराधनतःपूज्यावंद्यालोकेषुनित्यशः ॥ महाप्रतापिनःसर्वेभ्रामर्यास्तुप्रसादतः ॥ ३२ ॥ नारदउवाच ॥ केयंसाभ्रामरीदेवीकथं जाताकिमात्मिका ॥ तदाख्यानंवदप्राज्ञविचित्रंशोकनाशकम् ॥ ३३ ॥ नतृप्तिमधिगच्छामिपिबन्देवीकथामृतम् ॥ अमृतंपिबतांमृत्युर्नाऽस्यश्रवण तोयतः ॥ ३४ ॥ श्रीनारायणउवाच ॥ शृणुनारदवक्ष्यामिजगन्मातुर्विचेष्टितम् ॥ अचिंत्याव्यक्तरूपायाविचित्रंमोक्षदायकम् ॥ ३५ ॥ यद्यच्चरित्रंश्री देव्यास्तत्सर्वंलोकहेतवे ॥ निर्व्याजयाकरुणयापुत्रेमातुर्यथातथा ॥ ३६ ॥ पूर्वंदैत्योमहानासीदरुणाख्योमहाबलः ॥ पातालेदैत्यसंस्थानेदेवद्वेषीम हाखलः ॥ ३७ ॥ सदेवाञ्जेतुकामश्चचकारपरमंतपः ॥ पद्मसंभवमुद्दिश्यसनस्त्राताभविष्यति ॥ ३८ ॥ गत्वाहिमवतःपार्श्वेगंगाजलसुशीतले ॥ पक्वप र्णाशनोयोगीसंनिरुध्यमरुद्गणम् ॥३९॥ गायत्रीजपसंसक्तःसकामस्तमसायुतः ॥ दशवर्षसहस्राणिततोवारिकणाशनः ॥ ४० ॥ दशवर्षसहस्राणिततः पवनभोजनः ॥ दशवर्षसहस्राणिनिराहारोऽभवत्ततः ॥ ४१ ॥ एवंतपस्यतस्तस्यशरीरादुत्थितोऽनलः ॥ ददाहजगतींसर्वांतदद्भुतमिवाभवत् ॥ ४२ ॥ किमिदंकिमिदंचेतिदेवाःसर्वेचकंपिरे ॥ संत्रस्ताःसकलालोकाब्रह्माणंशरणंययुः ॥ ४३ ॥ विज्ञापितंदेववरैःश्रुत्वातत्रचतुर्मुखः ॥ गायत्रीसहितोहंसस मारूढोययौमुदा ॥ ४४ प्राणमात्रावशिष्टंतंधमनीशतसंकुलम् ॥ शुष्कोदरंक्षामगात्रंध्यानमीलितलोचनम् ॥ ४५ ॥

दत तिश्रुत्वापृच्छति नारदउवाच ॥ केयमिति ॥ ३३ ॥ अस्यश्रवणमात्रेणैवमृत्युर्नास्तीत्यर्थः ॥ ३४ ॥ ३५ ॥ ३६ ॥ अरुणाख्यःअयंविप्रचित्तिवंशोद्भवइतिपुराणांतरेस्पष्टम् ॥ ३७ ॥ ॥३८॥ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ४६ ॥ ४७ ॥ ४८ ॥ ब्रह्मप्रणवंगायत्रींवाजपंतम् ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ नपुंभ्योनापियोषितइति ॥ अत्रस्त्रीपुंशब्देनमनुष्याकारावेवस्त्रीपुमांसौगृह्येतेनपुरुषमात्रंनवास्त्रीलिंगमात्रं ॥

ददर्शतेजसादीप्तंद्वितीयमिवपावकम् ॥ वरंवरयभद्रंतेवत्सयन्मनसिस्थितम् ॥ ४६ ॥ श्रुतिमात्रेणसंतोषकारकंवाक्यमूचिवान् ॥ श्रुत्वाब्रह्ममुखाद्वाणीं
सुधाधारामिवारुणः ॥ ४७ ॥ उन्मीलिताक्षःपुरतोददर्शजलजोद्भवम् ॥ गायत्रीसहितंदेवंचतुर्वेदसमन्वितम् ॥ ४८ ॥ अक्षसूत्रकुंडिकाहस्तंजपंतंब्रह्म
शाश्वतम् ॥ दृष्ट्वोत्थायननामाऽथस्तुत्वाचविविधैःस्तवैः ॥ ४९ ॥ वरंवव्रेस्वबुद्धिस्तंमाभवेन्मृत्युरित्यपि ॥ श्रुत्वाऽरुणवचोब्रह्माबोधयामाससादरम् ॥
॥ ५० ॥ ब्रह्मविष्णुमहेशाद्यामृत्युनाकवलीकृताः ॥ तदाऽन्येषांतुकावार्तामरणेदानवोत्तम ॥ ५१ ॥ वरंयोग्यंततोब्रूहिदातुंयःशक्यतेमया ॥ नाऽन्या
ऽऽग्रहंप्रकुर्वीतिबुद्धिमंतोजनाःक्वचित् ॥ ५२ ॥ इतिब्रह्मवचःश्रुत्वापुनःप्रोवाचसादरम् ॥ नयुद्धेनचशस्त्रास्त्रान्नपुंभ्योनापियोषितः ॥ ५३ ॥ द्विपाद्भयो
वाचतुष्पाद्भ्योनोभयाकारतस्तथा ॥ भवेन्मेमृत्युरित्येवंदेवदेहिवरंप्रभो ॥५४॥ बलंचविपुलंदेहियेनदेवजयोभवेत् ॥ इतितस्यवचःश्रुत्वातथास्त्वितिव
चोऽब्रवीत् ॥ ५५ ॥ दत्त्वावरंजगामाऽऽशुपद्मजःस्वंनिकेतनम् ॥ ततोरुणाख्योदैत्यस्तुपातालात्स्वाश्रयस्थितान् ॥ ५६ ॥ दैत्यानाकारयामासब्रह्म
णोवरदर्पितः ॥ आगत्यतेऽसुराःसर्वेदैत्येशंतंप्रचक्रिरे ॥५७॥ दूतंचप्रेषयामासुर्युद्धार्थममरावतीम् ॥ दूतवाक्यंतदाश्रुत्वादेवराड्भयकंपितः ॥५८॥ देवैःसा
र्धंजगामाऽऽशुब्रह्मणःसदनंप्रति॥ब्रह्माविष्णूपुरस्कृत्यजग्मुस्तेशंकरालयम् ॥५९॥ विचारंचक्रिरेतत्रवधार्थंतेसुरद्रुहाम् ॥एतस्मिन्समयेतत्रदैत्यसेनासमावृ
तः ॥६०॥ अरुणाख्योदैत्यराजोजगामाऽऽशुत्रिविष्टपम् ॥ सूर्यैर्दुयमवह्नीनामधिकारान्पृथक्पृथक् ॥६१॥ स्वयंचकारतपसानानारूपधरोमुने ॥ स्वस्व
स्थानच्युताःसर्वेजग्मुःकैलासमंडलम् ॥६२॥ शशंसुःशंकरंदेवाःस्वस्वदुःखंपृथक्पृथक् ॥ महान्विचारस्तत्राऽऽसीत्किंकर्तव्यमतःपरम् ॥६३ ॥ नयुद्धेन
चशस्त्रास्त्रैर्नपुंभ्योनापियोषितः॥द्विपाद्भयोवाचतुष्पाद्भ्योनोभयाकारतोऽपिवा॥६४॥मृत्युर्मेवंदितिब्रह्माप्रोवाचवचनंयतः॥ इतिचिंतातुराःसर्वेकर्तुंकिंचि
न्नचक्षमाः ॥६५॥ एतस्मिन्समयेतत्रवागभूदशरीरिणी ॥ भजध्वंभुवनेशानींसावःकार्यविधास्यति ॥६६ ॥ गायत्रीजपसंसक्तोदैत्यराज्यंदितांत्यजेत् ॥ मृ
त्युयोग्यस्तदाभूयादित्युच्चैस्तोषकारिणी॥६७॥श्रुत्वादैवींतथावाणींमंत्रयामासुराहताः ॥ बृहस्पतिंसमाहूयवचनंप्राहदेवराट्॥६८॥गुरोगच्छसुराणांतु
कार्यार्थमसुरंप्रति॥यथाभवेच्चगायत्रीत्यागस्तस्यतथाकुरु॥६९॥अस्माभिःपरमेशानीसेव्यतेध्याननयोगतः॥प्रसन्नासाभगवतीसाहाय्यंतेकरिष्यति ॥७०॥

अन्यथाद्विपाच्चतुष्पादादीनामपिस्त्रीपुंसोरेगंतर्भावात्तेगं पुनर्ग्रहणंव्यर्थमेवस्यादतएवदेव्याःस्त्रीपुंरूपैपंन्नमरैर्दैत्यस्यवधेकृतेऽपिनदोषइतिबोध्यम् ॥ ५३ ॥ नोभयाद्विपाच्चतुष्पाद्रूपनारसिंहगजानना
द्युभयात्मकरूपान्नपुंसकरूपाच्चेत्यर्थः ॥ भ्रमराणांषट्पदत्वान्नद्विपात्त्वंचतुष्पात्त्वंवा ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जांबूनदेश्वरी अष्टमस्कंधोक्तजंब्वादनेश्वरीमित्यर्थः ॥ ७१ ॥ देवीमखःपूर्वोक्तोदेवीयज्ञः ॥ ७२ ॥ ७३ ॥ अरातिःशत्रुः ॥ तथाचशत्रुगृहेतवागमनमनुचितमितिभावः ॥७४॥ ७५ ॥ ७६ ॥ तत्याजेति॥ ननुबृहस्पतिवाक्यश्रवणमात्रेणकथंतेनस्वेष्टदेवतागायत्रीत्यक्तेतिचेत्स्वेष्टदेवतात्यागोभवतुसर्वस्वनाशोवाभवतुतथाऽपिदेवपक्षपातित्वंनस्वीकरिष्यामीत्याशयात् ॥ इत्थंदेवद्वेषेऽपिकारणंतुमोहितोदेवमाययेतिमूलेएवोक्तम् ॥ देवसेवयाजांबूनदेश्वरीप्रसन्नादैत्यंमुमोहसचमोहितोदैत्यएवमभिमानेनगायत्रींतत्याजेतितदर्थः ॥ ननुदेव्याापिस्वोपासकोदैत्यःकथंमोहितइतिचेन्न ॥ सकामस्तम

इत्यादिश्यगुरुंसर्वेजग्मुर्जांबूनदेश्वरीम् ॥ सास्मान्दैत्यभयत्रस्तान्पालयिष्यतिशोभना ॥ ७१ ॥ तत्रगत्वातपश्चर्याचक्रुःसर्वेसुनिष्ठिताः ॥ मायाबीजजपासक्तादेवीमखपरायणाः ॥ ७२ ॥ बृहस्पतिस्ततःशीघ्रंजगामाऽसुरसन्निधौ ॥ आगतंमुनिवर्यंतंपप्रच्छाऽथसदैत्यराट् ॥ ७३ ॥ मुनेकुत्राऽगमःकस्मात्किमर्थमितिमेवद॥नाहंयुष्मत्पक्षपातीप्रत्युतारातिरेवच ॥ ७४ ॥ इतितस्यवचःश्रुत्वाप्रोवाचमुनिनायकः॥अस्मत्सेव्याचयादेवीसात्वयापूज्यतेऽनिशम् ॥ ॥७५॥ तस्मादस्मत्पक्षपातीनभवेस्त्वंकथंवद ॥ इतितस्यवचःश्रुत्वामोहितोदेवमायया ॥ ७६ ॥ तत्याजपरमंमंत्रमभिमानेनसत्तम ॥ गायत्रीत्यागतोदैत्योनिस्तेजस्कोबभूवह ॥ ७७ ॥ कृतकार्योगुरुस्तस्मात्स्थानान्निर्गतवान्पुनः ॥ ततोवृत्तांतमखिलंकथयामासवज्रिणे ॥ ७८ ॥ संतुष्टास्तेसुराःसर्वेभेजिरेपरमेश्वरीम् ॥ एवंबहुगतेकालेकस्मिंश्चित्समयेमुने ॥ ७९ ॥ प्रादुरासीज्जगन्माताजगन्मंगलकारिणी ॥ कोटिसूर्यप्रतीकाशाकोटिकंदर्पसुंदरा ॥ ॥ ८० ॥ चित्रानुलेपनादेवीचित्रवासोयुगान्विता ॥ विचित्रमाल्याभरणाचित्रभ्रमरमुष्टिका ॥ ८१ ॥ वराभयकराशांताकरुणामृतसागरा ॥ नानाभ्रमरसंयुक्तपुष्पमालाविराजिता ॥ ८२ ॥ भ्रमरीभिर्विचित्राभिरसंख्याभिःसमावृता ॥ भ्रमरैर्गायमानैश्चह्रींकारमनुमन्वहम् ॥ ८३ ॥ समंततःपरिवृताकोटिकोटिभिरंबिका ॥ सर्वशृंगारवेषाढ्यासर्ववेदप्रशंसिता ॥ ८४ ॥ सर्वात्मिकासर्वमयीसर्वमंगलरूपिणी ॥ सर्वज्ञासर्वजननीसर्वासर्वेश्वरीशिवा ॥ ८५ ॥ दृष्ट्वातांतरलात्मानोदेवाब्रह्मपुरोगमाः ॥ तुष्टुवुर्दृष्टमनसोविष्टरश्रवसंशिवाम् ॥ ८६ ॥ देवाऊचुः ॥ नमोदेविमहाविद्येसृष्टिस्थित्यंतकारिणि ॥ नमःकमलपत्राक्षिसर्वाधारेनमोऽस्तुते ॥ ८७ ॥ सविश्वतैजसप्राज्ञविराट्सूत्रात्मिकेनमः ॥ नमोव्याकृतरूपायैकूटस्थायैनमोनमः ॥ ८८ ॥ दुर्गेसर्गादिरहितेदुष्टसंरोधनार्गले ॥ निरर्गलप्रेमगम्येभर्गेदेविनमोऽस्तुते ॥ ८९ ॥ नमश्रीकालिकेमातर्नमोनीलसरस्वति ॥ उग्रतारेमहोग्रेतेनित्यमेवनमोनमः ॥ ९० ॥ नमःपीतांबरेदेविनमस्त्रिपुरसुंदरि ॥ नमोभैरविमातंगिधूमावतिनमोनमः ॥ ९१ ॥

सायुतइतिपूर्वोक्तवचनेनतस्यनिष्कामोपासकत्वाभावात् ॥ निष्कामोपासकएवदेवानांप्रियोभवतिनान्यइतितुबृहदारण्यकेपुराणांतरेषुचस्पष्टम् ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ चित्रभ्रमरामुष्टौयस्याःसा ॥८१॥८२॥ह्रींकारमनुंह्रींकारमंत्रंगायमानैर्भ्रमरैरित्यन्वयः॥एतेनसर्वेदेवीनिकटस्थाह्रींकारमंत्रजपशालिनोभवंतीतिबोधितम् ॥८४॥८५॥ विष्टरश्रवसंविष्टरोवेदास्तेषुश्रवःश्रवणंयस्याःसाविष्टरेभ्योवाश्रवोयस्याःसातांवेदप्रतिपाद्यामित्यर्थः॥८६॥८७॥८८॥अर्गलागृंखला॥भर्गापापस्यभर्जनात्अविद्यादिभर्जनाद्वा॥८९॥कालिकादयोदशमहाविद्यास्तंत्रेषुप्रसिद्धाः॥९०॥पीतांबराबगलामुखी९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ भ्रमरैर्वेष्टितेति ॥ भ्रमराणामियंस्वामिनीभ्रामरीत्यर्थेतस्येदमित्यण्णंतात्ङीप् ॥ ९९ ॥ १०० ॥ १ ॥ २ ॥

छिन्नमस्तेनमस्तेऽस्तुक्षीरसागरकन्यके ॥ नमःशाकंभरिशिवेनमस्तेरक्तदंतिके ॥ ९२ ॥ निशुंभशुंभदलनिरक्तबीजविनाशिनि ॥ धूम्रलोचननिर्नाशेवृत्रासुरनिबर्हिणि ॥ ९३ ॥ चंडमुंडप्रमथिनिदानवांतकरेशिवे ॥ नमस्तेविजयेगंगेशारदेविकचानने ॥ ९४ ॥ पृथ्वीरूपेदयारूपेतेजोरूपेनमोनमः ॥ प्राणरूपेमहारूपेभूतरूपेनमोऽस्तुते ॥ ९५ ॥ विश्वमूर्तेदयामूर्तेधर्ममूर्तेनमोनमः ॥ देवमूर्तेज्योतिर्मूर्तेज्ञानमूर्तेनमोऽस्तुते ॥ ९६ ॥ गायत्रिवरदेदेविसावित्रिचसरस्वति ॥ नमःस्वाहेस्वधेमातर्दक्षिणेतेनमोनमः ॥ ९७ ॥ नेतिनेतीतिवाक्यैर्यांबोध्यतेसकलागमैः ॥ सर्वप्रत्यक्स्वरूपांतांभजामःपरदेवताम् ॥ ९८ ॥ भ्रमरैर्वेष्टितायस्माद्भ्रामरीयाततःस्मृता ॥ तस्यैदेव्यैनमोनित्यंनित्यमेवनमोनमः ॥ ९९ ॥ नमस्तेपार्श्वयोःपृष्ठेनमस्तेपुरतोंऽबिके ॥ नमऊर्ध्वं नमश्चाधःसर्वत्रैवनमोनमः ॥ १०० ॥ कृपांकुरुमहादेविमणिद्वीपाधिवासिनि ॥ अनंतकोटिब्रह्मांडनायिकेजगदंबिके ॥ १ ॥ जयदेविजगन्मातर्जयदेविपरात्परे ॥ जयश्रीभुवनेशानिजयसर्वोत्तमोत्तमे ॥ २ ॥ कल्याणगुणरत्नानामाकरेभुवनेश्वरि ॥ प्रसीदपरमेशानिप्रसीदजगतोरणे ॥३॥ नारायणउवाच ॥ इतिदेववचःश्रुत्वाप्रगल्भंमधुरंवचः ॥ उवाचजगदंबासामत्तकोकिलभाषिणी ॥ ४ ॥ श्रीदेव्युवाच ॥ प्रसन्नाऽहंसदादेवावरदेशशिखामणिः ॥ ब्रुवंतुविबुधाःसर्वेयदेवस्याच्चिकीर्षितम् ॥ ५ ॥ देवीवाक्यंसुराःश्रुत्वाप्रोचुर्दुःखस्यकारणम् ॥ दुष्टदैत्यस्यचरितंजगद्बाधाकरंपरम् ॥ ६ ॥ देवब्राह्मणवेदानांहेलनंनाशनंतथा ॥ स्थानभ्रंशंसुराणांचकथयामासुराहृताः ॥ ७ ॥ ब्रह्मणोवरदानंचयथावत्तेसमूचिरे ॥ श्रुत्वादेवमुखाद्वाणींमहाभगवतीतदा ॥ ॥ ८ ॥ प्रेरयामासहस्तस्थान्भ्रमरान्भ्रामरीतदा ॥ पार्श्वस्थानग्रभागस्थान्नानारूपधरांस्तदा ॥ ९ ॥ जनयामासबहुशोयैर्व्याप्तंभुवनत्रयम् ॥ मटचीयूथवत्तेषांसमुदायस्तुनिर्गतः ॥ ११० ॥ तदांऽतरिक्षंतैर्व्याप्तमंधकारःक्षितावभूत् ॥ दिविपर्वतशृंगेषुद्रुमेषुविपिनेष्वपि ॥ ११ ॥ भ्रमराएवसंजातास्तदद्भुतमिवाऽभवत् ॥ तेसर्वेदैत्यवक्षांसिदारयामासुरुद्धताः ॥ १२ ॥ नरंमधुहरंयद्वन्मक्षिकाःकोपसंयुताः ॥ उपायोनचशस्त्राणांतथाऽस्त्राणांतदाऽभवत् ॥ ॥ १३ ॥ नयुद्धंनचसंभाषाकेवलंमरणंखलु ॥ यस्मिन्यस्मिन्स्थलेयेयेस्थितादैत्यायथायथा ॥ १४ ॥ तत्रैवचतथासर्वेमरणंप्रापुरुत्स्मयाः ॥ परस्परंसमाचारोनकस्याप्यभवत्तदा ॥ १५ ॥ क्षणमात्रेणतेसर्वेविनष्टादैत्यपुंगवाः ॥ कृत्वेत्थंभ्रमराःकार्यंदेवीनिकटमाययुः ॥ १६ ॥

जगतोरणेजगद्योने ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ मटचीयूथवदिति ॥ मटचीशब्देनशलभाश्छांदोग्यभाष्येमटचीहतेषुकुरुष्विति श्रुतौमटचीशब्देनकरकाग्रहीतास्तावामटचीशब्देनोच्यंते ॥ ११० ॥ ११ ॥ १२ ॥ मधुहरंमाक्षिकहरम् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ ॥श्र॥ ॥श्र॥ ॥श्र॥ ॥श्र॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ १७ ॥ १८ ॥ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ १२७ ॥ श्रीमच्छैवकुलोत्पन्नोरंगनाथात्मजःसुधीः ॥ श्रीलक्ष्मीगर्भसंभूतोनीलकंठोभिधानतः ॥ १ ॥

आश्चर्यमेतदाश्चर्यमितिलोकाःसमूचिरे ॥ किंचित्रंजगदंबायायस्यामायेयमीदृशी ॥ १७ ॥ ततोदेवगणाःसर्वेब्रह्मविष्णुपुरोगमाः ॥ निमग्नाहर्षजलधौ पूजयामासुरंबिकाम् ॥ १८ ॥ नानोपचारैर्विविधैर्नानोपायनपाणयः ॥ जयशब्दंप्रकुर्वाणामुमुचुःसुमनांसिच ॥ १९ ॥ दिविदुंदुभयोनेदुर्ननृतुश्चाप्सरोगणाः ॥ पेठुर्वेदान्मुनिश्रेष्ठागंधर्वाद्याजगुस्तथा ॥ २० ॥ मृदंगमुरजावीणाढक्काडमरुनिःस्वनैः ॥ घंटाशंखनिनादैश्चव्याप्तमासीज्जगत्त्रयम् ॥ ॥ २१ ॥ नानास्तोत्रैस्तदास्तुत्वामूर्ध्न्यधायांजलींस्तदा ॥ जयमातर्जयेशानीत्येवंसर्वेसमूचिरे ॥ २२ ॥ ततस्तुष्टामहादेवीवरान्दत्त्वापृथक्पृथक् ॥ स्वस्मिंश्चविपुलांभक्तिंप्रार्थितांतैर्ददौचताम् ॥ २३ ॥ पश्यतामेवदेवानामंतर्धानंगतातताः ॥ इतितेसर्वमाख्यातंभ्रामर्याश्चरितंमहत् ॥ २४ ॥ पठतांशृण्वतांचैवसर्वपापप्रणाशनम् ॥ श्रुतमाश्चर्यजनकंसंसारार्णवतारकम् ॥ २५ ॥ एवंमनूनांसर्वेषांचरितंपापनाशनम् ॥ देवीमाहात्म्यसंयुक्तंपठन्शृण्वन्नृशुभप्रदम् ॥ २६ ॥ यश्चैतत्पठतेनित्यंशृणुयाद्योऽनिशंनरः ॥ सर्वपापविनिर्मुक्तोदेवीसायुज्यमाप्नुयात् ॥ १२७ ॥ इतिश्रीदेवीभागवतेमहापुराणे दशमस्कंधेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ७ ॥ ॥ दशमस्कंधःसमाप्तः ॥ १० ॥

सार्धरुद्रैःपंचशत (५११ ॥) श्लोकैर्व्यासकृतैःशुभैः ॥ देवीभागवतस्यास्यदशमस्कंधईरितः ॥ १ ॥

देवीभागवतव्याख्यांतिलकाख्यांससर्जयाम् ॥ दशमस्कंधएतस्याःसमाप्तोऽभूच्छुभार्थदः ॥ २ ॥ ॥ इतिश्रीशैवोपनामकरंगभट्टसुतलक्ष्मीगर्भजनीलकंठकृतेदेवीभागवतव्याख्यानेतिलकाभिधे दशमस्कंधेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ७ ॥ ॥ स्कंधश्चायंसमाप्तः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीमद्देवीभागवते दशमस्कंधः समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=15.07.20 11:08
,TRANSFERRED=2020/07/15 at 11:11:49
,PAGES=27
,TYPE=STD
,NAME=S0003322
,Book Name=M-2772-SHRIMAD DEVIBHAGWAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection